# GOPĀLA SAHASRANĀMA STOTRAM

*Critically Edited by*


**Dr. N. S. R. TATACHARYA**

**Dr. M. D. BALASUBRAHMANYAM**



Q22:4146
15M85
232213



TIRUMALA TIRUPATI DEVASTHANAMS

TIRUPATI.

**1986**

23213

# GOPĀLA SAHASRANAMA STOTRAM

*Critically Edited by*

Dr. N. S. R. TATACHARYA

Dr. M. D. BALASUBRAHMANYAM

*with the Commentary*

## BHAGAVADGUṆARATNA PEṬIKĀ

*by*

Dr. N. S. R TATACHARYA

TIRUMALA TIRUPATI DEVASTHANAMS, TIRUPATI.

1985

Sh-108

GOPĀLA SAHASRANĀMA STOTRAM

by

Dr. N. S. R. TATACHARYA

Dr. M. D. BALASUBRAHMANYAM

PLACED ON THE SHELF
Date 22.8.95

T. T. D. Religious Publications Series No. 221

Copies: 5,000

Q22:4'46
15M85
Q22:4146
15M85

Published by :

S. LAKSHMINARAYANA, I.A.S.
Executive Officer.
T. T. Devasthanams, Tirupati

SRI VENKATESWARA
CENTRAL LIBRARY &
RESEARCH CENTRE,
Acc. No. 23213
Date
TIRUPATI.

Printed at :
T. T. D. Press, Tirupati.

# गोपालसहस्रनामस्तोत्रम्

तर्कवाचस्पति-शास्त्ररत्नाकर-
चतुःशास्त्रप्रवीणादिबिरुदाङ्कितेन

डा. एन्. एस्. रामानुजताताचार्येण कृतया

भगवद्गुणरत्नपेटिकाव्याख्यया सहितं

पाठभेदादिपुरःसरं संपादितं च ।

तिरुमल तिरुपति देवस्थानम्,
तिरुपतिः

१९८५

# FOREWORD

It is with pleasure that I welcome this opportunity to offer the *Gopālasahasranāmastotram* to our readers, particularly at a time when the T.T.D. has just completed the silver Jubilee celebrations. On this occasion several books and monographs have been brought out, which serve as TTD's humble contribution to Indian religious literature.

The *Gopalasahasranāma* contains 193 verses in simple Sanskrit, accompanied by 1000 names of Gopala (Sri Krishna), which are meant to be sung by the devotees, and it has been narrated by Lord Siva to Parvati. Although the exact date of its composition cannot be fixed with certainty, it may well be placed at the time when the *Bhakti* school of Vaishnavism reached its height. It deals with the ten incarnations of Vishnu. Yet Lord Krishna plays a significant role in the poem. The Radha-Krishna cult is vividly portrayed here.

In fact the central theme of the lyric revolves round the doctrine of devotion (bhakti) towards the Lord, and it is drawn from the Puranas which depict the life and explcits of Krishna. Its affiliation to the Vaishnava School is certain. But occasionally the influence of Pancaratra and the Tantras can be seen in the book. The author of the poem has shown that from *one eterna light* springs forth Radha and Krishna.

The TTD undertook the publication of the poem (critically edited by Drs M. D. Balasubrahmanyam and N. S. R. Tatacharya, with a simple and fine commentary by the latter) for two reasons: first, that the previous editions were not critically constituted, and second, that this devotional poem must be popularised in South India. As a matter of fact one can hear its recitation in the temple towns of Mathura, Brindavan and other sacred centres in general and the Northern school of Vaishnavism in particular.

The benefits accruing from the daily recitation of the text have been stated at the end of the devotional poem. Its study

removes poverty, releases man from suffering, frees a nation from famine, brings in wealth and prosperity. A devotee who repeats the 1000 names of the Lord with faith in Him, reaches the eternal abode of Vishnu.

I earnestly wish that the daily recitation of the sacred poem will go a long way to satisfy the mental and spiritual hankerings of all men and women. May the publication activities of T.T.D. come true for the benefit of mankind.

S. LAKSHMINARAYANA,
Executive Officer,
T. T Devasthanams.

Tirupati.

# EDITORIAL PREFACE

The *Gopālasahasranama* (hereafter abbreviated to *GSN*) is a devotional poem *in excelsis* the thousand divine names of Gopāla or Lord Kṛṣṇa in 193 verses (Introductory stanzas 23, meditative hymns 2, *sahasranāma* 142 and *phalaśruti* 26) composed in simple *anuṣṭub* metre. It professes to form part of the संमोहनतन्त्रम् or संमोहन-संहिता excerpted from the रुद्रयामल-work. It is also called गोपालसहस्र नामस्तवः, सहस्रनाम स्तोत्रम्, राधिकानाथ-सहस्रनाम, जगत्कल्याणसंहिता and so on. But the proper title of the poem is *GSN*, and the colophon at the end of Ms. No. D. 8293 (*Catalogus Catalogorum*, Madras) reads as follows:

इति श्रीसंमोहनतन्त्रे पार्वतीपरमेश्वरसंवादे गोपालसहस्रनाम समाप्तम्।

Lord Śaṁkara narrates the poem to Goddess Pārvatī. It is said in *GSN* (vs. 21) that originally Lord कृष्ण communicated the poem to God शिव and then to राधा who passed it on, in turn to Sage Nārada. From him the devotees of विष्णु would come to know *GSN* in the Kali age, since it could pave the path for universal welfare and immortality.

The idea that a critical edition of *GSN* must be brought out was first suggested to me in 1978 by Professor Dr. K. Satchidananda Murthy (former Vice-chancellor, S. V. University and Chairman, S. P. Samiti of Kendriya Sanskrit Vidyapeetha, Tirupati). He wanted us to prepare an authentic version of the popular Kṛṣṇaite devotional poem based on reliable Mss., with a lucid commentary on the critically constituted text. Accordingly Professor Dr. N. S. R. Tatacharya of K. S. Vidyapeetha, an erudite scholar in four Śāstras, wrote a simple commentary entitled, भगवद्गुणरत्नपेटिका (lit. the box containing gems in the form of the Lord's qualities), based on the Rāmānuja's school of philosophical thought. He interpreted the narratives, allusions, concepts, epithets, contained in *GSN* by tracing their sources to the रामायण, महाभारत, भगवद्गीता, and the Purāṇas. He would strike a balance between the subject matter and the style of the text in

such a manner that those who possess a working knowledge of the Sanskrit language could read, understand and appreciate the thousand names glorifying Gopāla.

Numerous Mss. of *GSN* are deposited in archives, Oriental Mss. Libraries, Temple collections and private possessions. These are available at Adyar, Allahabad, Alwar, Bharatpur, Bombay, Calcutta, Dacca, Jodhpur, Kotah, London, Madras, Mithila Mysore, Nepal, Paris, Pune, Rangpur, Thanjavur, Udaipur, Ujjain, Vishvabharati (Santiniketan) and other places in India and abroad.

The text of *GSN* was printed in Bombay with Hindi commentaries in 1833, 1912 and 1923-4. It was also printed in the *Bṛhatstotraratnākara* (Part I), published from Madras. Thirty-one printed books are available in the holdings of India Office Library. From these texts and Mss., it can be seen that *GSN* is excerpted from the *Sammohanatantra* of the *Rudrayāmala*. Mm. Gopinath Kavi Raj in his Bibliography of the *Tantrasaṁhitā* (Lucknow, 1972), refers to three *Sammohanatantras*, all of which were said to be narrated by Lord Śiva to Pārvatī. Although different versions of *GSN* were drawn from the Tantras, the present text has to be differentiated from the other books bearing the same tittle.

The critical edition of *GSN*, placed before the public and elite, which we have constituted now, is based on three Mss. well preserved in GOML (Madras), TMSSML (Thanjavur) and the Sarasvati Bhavan Library (S. Sanskrit University, Varanasi) besides two books printed from Bombay in 1894 and 1963 and one from Dwaraka (the last one handed over to us by Professor *K. S. MURTY*). On a careful scrutiny of several Mss. recensions, the editors felt that, to bring out a simpler version of *GSN*, it was sufficient to consult the above mentioned Mss. and printed books, since the text constituted by us, agrees well with the majority of readings found in many other Mss. To cite an instance, two Mss. deposited in *G. N. JHA* K. S. V. Mss. Library at Allahabad bearing accession numbers 7040/995 and 10705/1581 bear striking resemblance to the Bombay and Thanjavur Mss.

A commentary on *GSN*, written by Sivadayala *SARMA*, is available in the S. Sanskrit University (accession numbers 19457

and 21841). This commentary is incomplete, and it is based on the Nimbārka system of philosophy.

I now give a description of the books and Mss., indicating their abbreviations used, in our critical edition. The basic text adopted by us for the reconstitution of the text is the one published by Thakur Prasad and sons, Bookseller, Rajadarvaja, Varanasi. For making a comparative study of the variant readings, three Mss. and two printed versions of *GSN* have been utilised.

(i) क—Madras. Govt. Oriental Mss. Library, Madras ( a paper Transcript). D. No. 8293. गोपाल सहस्रनाम स्तोत्रम्. Substance : Paper; Size : 7⅝ ×6½ inches; Pages: 8 Lines: 26 on a page: Character: Telugu: Condition: good; Appearance: old; complete.

(ii) ख—Adyar Library, Adyar. Madras. Printed book; General Acc. No. 3102 श्रीगोपालसहस्रनामस्तोत्रप्रारम्भः। Nirnaya Sagar Press, Bombay, 1894.

(iii) ग—Tanjore Maharaja-Serfoji—Sarasvati Mahal Library, Tanjore; paper transcript. गोपाल सहस्रनाम । D. No. 20947. (Gopalakrishna Dhavalekar) G.K.D. No. 252. Substance: paper: Sheets 7; Lines: 9: Letters per line। 22—24; Script: Devanagari; Condition: good. Appearance: old; Incomplete.

(iv) घ—Tranjore MSSM Library, Tanjore; Printed book; Sanskrit section No. 3834; (on the wrapper: बृहत्स्तोत्र रत्नाकर: प्रथमो भाग: । स्तोत्र संख्या 227; परिवर्धितं संस्करणम् 1963; Nirnaya Sagar Press, Bombay-2. The front page reads: बृहत्स्तोत्र रत्नाकर: गणेश विष्णु शिव स्तोत्रात्मकः । प्रथमो भाग: (स्तोत्राणि 1—225). Narayana Ram Acharya (Ed.). पञ्चदशं संस्करणम्, 1963, Nirnaya Sagar Press, Bombay-2.

(v) ङ—Paper Tanscript, S. Skt. University, Varanasi, Sarasvati Bhavan. Acc. No. 43208: Subject: *Stotram.*

क्र॰ सं. 1/127°. Name: गोपाल सहस्रनाम स्तोत्रं सटीकम् (संमोहन तन्त्रे) । पत्र सं: 1–4'. टी का⊥. श्लोक सं... अक्षर संख्या (पंक्ती) 49. पंक्ति सं (पृष्ठे) 13. आकार:– 13" × 6".7". लिपि: — दे. ना./आधार: — का/वि. विवरणम् — पू./No. 17662 आ. 3207.

The exact date of composition of *GSN* cannot be ascertained with certainty. From the internal evidence furnished in vs. 140, and at other places, we might take it for granted that most probably, it might belong to the period when the *Bhakti* school of Vaishnavism reached its zenith. Obviously the poem is meant to be recited by the devotees of Lord कृष्ण in general and the Vaishnavites in particular. This is known from the stanzas occurring in the फलश्रुति (verses 2, 4, 8, 10, 14 and 16). Since it is stated in the 16th verse that the Vaishnava devotee who recites the poem will reach the Eternal abode of Lord विष्णु, there seems to be the affiliation of *GSN* to the *Bhakti*-school of Vaishnavism.

As a matter of fact, the poem is influenced by the Vedas, Purāṇas, Tantras, the Rāmāyaṇa, the Pāñcarātra canon and other devotional lyrics. The पुरुषसूक्त (RV X. 90. 1) is cited in verse No. 132. The ten incarnations of विष्णु have been concisely summed up in the poem, but Lord कृष्ण is the actor *par excellence*. When the author of the poem presents an outline of the life and exploits of the Universal God (कृष्ण:), he, of course, draws his materials from the Purāṇas, besides referring to their allusions. Apart from the influence exerted by the विष्णुपुराण and the भागवतपुराण, certain episodes narrated in the ब्रह्मवैवर्तपुराण have been made use of in *GSN*. The 21st verse in the फलश्रुति declares that a votary of Vaishnavism obtains the fruits of मोहनम्, स्तंभनम्, मारणम्, उच्चाटनम् and so on, which are typical Tāntraic concepts. The line— कम्बुग्रीवो विशालाक्षो लक्ष्मीवान् शुभलक्षण:—is a direct borrowing from the संक्षेप रामायणम्. That the Omnipotent, Omnipresent Lord has assumed five forms— पर, व्यूह, विभव, हार्द and अर्चा and that *He* is adored by *His* devotees in the forms of वासुदेव, संकर्षण and the rest, as has been

stated in verses 54 and 134 respectively, indicates the influence exerted by the Pāñcarātra canonical school. Moreover a reference is made to the 18 syllabled *Mantra* (i.e. सनातन गोपाल मन्त्रः) in verse No. 138.

It deserves mention in this connection that God is described as ब्रह्म सनातनः (vs. 13), ब्रह्म साक्षी (vs. 43), गणपतिः, नारायणः (vs. 69), कृष्णः (72). रामः (vs. 36) and so on, Concomitantly He is identified with शिवः, रुद्रः and हंसः (vs. 58), all of which might lead to different interpretations. But the devatā *par* excellence is *Gopāla—Rādhā* the divine couple of the universe.

The famous, oft-quoted verse— कस्तूरि तिलकं ... गोपाल चूडामणिः—has been directly borrowed from लीलाशुक's कृष्णकर्णामृतम्. Again in the फलश्रुति (vs. 12 d), the author of *GSN* has simply copied the stanzas occurring in the विष्णुसहस्रनामस्तोत्रम्.

In view of what has been stated in the above para, we have reasons to believe that the simpler verson of *GSN* excerpted from the संमोहनतन्त्र might have been developed into an ornamental text by the later redactors of the poem, perhaps to give status to it on the model of विष्णुसहस्रनामस्तोत्रम्. Talking in terms of the principles of textual criticism, one may legitimately point out here, that the later additions made to the ornamental text might be separated in order that the question of the date of *GSN* might be fixed.

The poem is clothed in the simple, familiar, popular *anuṣṭub* verses, thus making the language of *GSN* lucid. This is due to the fact that it is used not merely as a *Pūjā* manual but also as a devotional poem which has to be recited daily for the good of the nation. There is no ambiguity in language or thought. In order that its recitation might be made sweet, the author very often indulges in alliteration as an artful aid (verses 13, 57 to 59, 72, 73, 78, 81, 88, 132—133, 140 *et sequentia*). Linguistically speaking, there is free variation between *l* and *r* as seen in *guli* ~ *guri* (vs 73) and *v* and *b* in Bṛndāvana and Vṛndāvana (vs. 11, 136).

The author has referred to many place-names such as Bṛndāvana (vs. 11), Dvāraka (vs. 26), Sāketa (vs. 36) and Sri-

rangam (vs. 9). He is acquainted with the hermitages situated in Govardhana (verses 38, 116. 136), Badarīvana (vs. 84) and Vṛndāvana (verses 11, 136). Among the sacred rivers occurring in the poem, mention could be made of गङ्गा, यमुना, गोदा, वेत्रवती नर्मदा, तप्ती and कावेरी (vs. 54).

The edifice of the entire lyrical poem rests with *bhakti*, the *sine qua non* of devotional Hinduism. This bears ample testimony to the popularity of *GSN* particularly in the Northern centres of Vaishnavism. Even today one can hear its recitation in many religious assemblies and Vaishnavite shrines all over North India. Just as the विष्णुसहस्रनामस्तोत्रम् and the ललिता-सहस्रनाम स्तोत्रम् have become the most popular devotional lyrical poems in the South, *GSN* occupies an important position in the Northern school of Vaishnavism. From such utterances as वैष्णवानां प्रियकरम् (vs. 2), वैष्णवो विष्णुभक्तिमान् (vs 4) and वैष्णवो पठेन्नित्यम् (vs. 16), it is evident that the votaries of this school of Hinduism do regard *GSN* as daily prayer book. One of the reasons for choosing it as the sacred Bible of Vaishnavism, is that the devotees believe in the doctrine that form *One Eternal Light*, springs forth राधा and माधव (कृष्ण:).

I may now round up my Preface by saying that the following benefits accrue from the daily recitation of *GSN* and offering worship to the Lord through पूजा:—(i) Removal of physical, vocal and mental sins, (ii) freedom from poverty, diseases, fear and famine; (iii) acquisition of wealth, prosperity, offspring and of a good, noble husbund by the would-be-bride who is deeply devoted to the Lord; (iv) enjoyment of the fruits resulting from the performance of the गोदान, ब्रह्मयज्ञ, वाजपेय, and one thousand अश्वमेध sacrifices; and (v) the in-dwelling of the God in the residence of His devotees.

It is now left for me to express our profound gratitude to Professor *K S. MURTY* for the encouraging interest he has shown in the preparation of this critical edition, He expressed his wish to me that *GSN* may be dedicated to Lord Venugopalaswami of Sangam Jagarlamudi. Sarvashri P. V. R. K. Prasad and G. Kumaraswamy Reddi (former Executive Officers),

deserve my thanks for the interst they evinced in this publication. Shri Lakshminarayana, the present Executive Officer has kindly written the Foreword, and I express my gratitute to him. Shri R. Suryanarayanamurty (PRO) and K. Subba Rao (Editor, Saptha-giri, T. T. D.) deserve our thanks for accepting this edition for favour of publication by the T. T. D. Dr. U. Shankara Bhatta (Reader, K. S. Vidyapeetha) and Dr. K F. Govindan (former Lecturer, K. S. Vidyapeetha) have ably assisted the editors in providing us with all the materials required from the Mss, Libraries at Madras and Tanjore respectively. But for their assistance, the critical edition would not have seen the light of the day. Special acknowledgement should be made to Shri M. Vijayakumar Reddy, Manager of the T. T. D. Printing Press and his staff for the care and patience which they took in bringing out the critical edition. Finally we offer our reverential prayers to the Lord of Seven Hills and place *GSN* at the lotus-feet of Lord Kṛṣṇa who, in the language of the author of the poem, loves his devotees, removes their poverty and bestows His grace on them.

भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः ।
भक्तदारिद्र्यशमनो भक्तानां प्रीतिदायकः ॥

GOKULĀṢTAMĪ
20—8—84

**Malladi D. BALASUBRAHMANYAM.**

# शोधनिका

| पृष्ठ | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | ८ | प्रपच्छ | पप्रच्छ |
| १ | १८ | स्तोंत्रं | स्तोत्रं |
| ४ | १२ | माणिक्य | माणिक्यं |
| १३ | २७ | कृष्णन्दीवर | कृष्णेन्दीवर |
| २२ | १ | बृहत् | बृहन् |
| २३ | १७ | संश्लेषेण | संश्लेषणे |
| २४ | ६ | कोशशोक | कोकशोक |
| २५ | १९ | भाः | भासं |
| ४४ | ४ | भाः | भासं |
| ४७ | १८ | आराध्यतया | आराधकतया |
| ७४ | १४ | नरनामकस्य | नरकनामकस्य |
| ७४ | १५ | षष्ठितमे | षष्टितमे |
| ७४ | १६ | अन्वेषामपि | अन्येषामपि |
| ७६ | २ | षष्ठितमे | षष्टितमे |
| ७६ | ६ | गोवर्धन | गोवर्धन |
| ७८ | ३ | गोरिव | गौरिव |
| ८२ | १६ | तेहेन्द्रिय | देहेन्द्रिय |
| ८४ | १२ | वैकुण्ठाख्यस्याप्राकृत | वैकुण्ठाख्याप्राकृत |
| ८४ | १५ | आनन्दांश | अनानन्दांश |
| ८६ | २१ | भक्ताद्योषः | भक्ताद्योष |
| ८७ | ६ | "तथा मृत्युनाशनं मृत्योः नाशनं भवति" | इदं वाक्यं निष्कासनीयम् |

# गोपालसहस्रनामस्तोत्रम्

## भगवद्गुणरत्नपेटिकाख्यव्याख्यानसहितम्

पार्वत्युवाच—

**कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम् ।**
**ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः ॥ १ ॥**

पार्वती श्रीशङ्करं प्रति उवाच - उक्तवती । **रम्ये** — रमणीये मनोहरे, **कैलासशिखरे** — कैलासपर्वतस्य शिखरे, वर्तमानं **शङ्करम्** — सर्वसुखकरम् शिवम्, **गौरी** - पार्वती, **पृच्छति** — प्रपच्छ । लकारव्यत्यय आर्षः, वर्तमानसामीप्याद्वा वर्तमानवल्लकारः । किं पप्रच्छ? तदाह — ब्रह्माण्डेत्यादिना । **ब्रह्माण्डाखिले** — अखिले ब्रह्माण्डे, **त्वं नाथः** — ब्रह्माण्डान्तर्वर्तिसकलजन्तूनां पतिरीश्वर इत्यर्थः । ब्रह्माण्डाखिल इत्यत्र अखिलशब्दस्य आहिताग्न्यादिवत् परनिपातः । ब्रह्माण्डेऽखिलनाथस्त्वमिति पाठेऽप्ययमेवार्थः ! ब्रह्माण्डाखिलनाथस्त्वमिति पाठोऽप्यृजुरेव । सकलब्रह्माण्डनाथत्वे हेतुः **सृष्टिसंहारकारक** इति । सृष्टेः संहारस्य च कर्तेत्यर्थः । यो हि सृष्टिं संहारं च करोति स किल नाथः । 'स कारणं करणाधिपाधिपः' (श्वे. उ. ६-९) इत्यादिश्रुतेः ॥ १ ॥

हेत्वन्तरमाह—

**त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः ।**
**नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर ॥ २ ॥**

1 c. क. ख. ब्रह्माण्डाखिले नाथ त्वम्.

1 d. क. कारक.

2 d. ग. महेश्वरः

**लोकैः** — लोकेषु विद्यमानैः श्रेयस्कामैः सर्वैर्मानवैः **त्वमेव पूज्यसे**— अर्च्यसे। ब्रह्मविष्णुप्रमुखैः सुरैः देवैः आदिपदग्राह्यैः असुरैः बाणादिभिश्च त्वमेव पूज्यसे। तथा च त्वं सर्वेषां नाथः। एवं सति हे **महेश्वर**। महांश्चासौ ईश्वरश्च महेश्वरः तस्य सम्बुद्धिः। महेश्वरशब्दः परमशिवे योगरूढ इत्याहुः। **देवेश** देवानामीशः अधिपतिः तस्य सम्बुद्धिः। त्वं **कस्य स्तोत्रं**— कस्य गुणकीर्तनरूपं वाक्यजातम्, **नित्यम्** — अनुदिनम्, **पठसि** कस्यचित् गुणकीर्तनरूपा स्तुतिर्हि स्तुत्यस्य प्रसादद्वारा किंचित्फलमुद्दिश्य भवति। यस्य भवतः प्रसादं काङ्क्षन्तः भवन्तं स्तुवन्ति सर्वे देवादयः तेन भवता स्तुत्या प्रसादनीयः कोऽन्य उत्कृष्टो वर्तते? अतो भवता प्रतिदिनं क्रियमाणं कंचिदुद्दिश्य स्तोत्रपठनं व्यर्थमित्याशयः॥ २॥

तदेवाह

> आश्चर्यमिदमाख्यातं जायते मयि शङ्कर।
> तत्प्राणेश महाप्राज्ञ संशयं छिन्धि मे प्रभो॥ ३॥

अत्यन्तमिति पाठे अत्यन्तमाश्चर्यमित्यर्थः। **इदम्**—सर्वलोकनाथेन त्वया स्तोत्रपठनरूपम्, **आख्यातम्**—आख्यानं वृत्तमित्यर्थः। हे **शङ्कर**! **मयि**—मां प्रति, ममेति पाठेऽप्ययमेवार्थः। आश्चर्यं जायते भवति। **तत्**— तस्मात्। **प्राणेश**—मत्प्राणनाथ! त्वत्सन्निध्यधीनो मम प्राण इति भावः। **महाप्राज्ञ**! महती प्रज्ञा यस्य सः। फलितार्थोऽयम्। प्रकर्षेण जानातीति प्रज्ञः, प्रज्ञ एव प्राज्ञः, महांश्चासौ प्राज्ञश्च महाप्राज्ञः। यतस्त्वं सर्वसंशय-निराकरणक्षमप्रकृष्टज्ञानवान्, अतः हे प्रभो मम **संशयं छिन्धि**— निवर्तय। स्तोत्रपठनमनुचितमिति मदीयप्रश्नस्य समाधानं ब्रूहीत्यर्थः॥ ३॥

3 a. ख. आश्चर्यमिदमत्यन्तं.
ङ. आश्चर्यमिदमाख्यानं.
3 b. ख. जायते मम.
3 d. ख. छिन्धि शङ्कर.

अस्य प्रश्नस्य समाधानम् —

श्रीमहादेव *उवाच —

धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे ।
रहस्यातिरहस्यं च यत्पृच्छसि वरानने ॥ ४ ॥

हे **प्राणवल्लभे** — प्राणेश्वरि, प्राणवत् प्रिये इति वा । पार्वति त्वं **धन्या** — धनमर्हतीति धन्या परमपुरुषार्थलक्षणमोक्षयोग्या, **असि** — भवसि । एवं **कृतपुण्या** — कृतं पुण्यं सत्कर्म यया सा । **असि** – भवसि । यत् – यस्मात् कारणात् हे **वरानने** ! उत्कृष्टवदने । भगवन्माहात्म्यश्रवणौत्सुक्यसञ्जात-शोभातिशययुक्तवदने इति वा । **रहस्यातिरहस्यं** — रहस्येषु गोपनीयेषु अति-रहस्यं अत्यन्तगोपनीयं परिपृच्छसि । यत् परमपुरुषार्थसाधनं तदत्यन्तगोपनीयं सुसूक्ष्मं वस्तु । तद्विषयकजिज्ञासाया आविष्करणात् धन्यत्वं कृतपुण्यत्वं च पार्वत्या इति भावः ॥ ४ ॥

स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ५ ॥

**स्त्रीस्वभावात्** — स्त्रीणां य इदं प्रष्टव्यं न इदं प्रष्टव्यमिति विवेकरा-हित्यरूपः स्वभावः तस्मात् त्वं प्रयत्नतः गोपनीयं वस्तु हे **महादेवि!** महामोदयुक्ते, मोदार्थोऽत्र दिव्धातुः । **परिपृच्छसि** । प्रयत्नत इत्यस्य गोपनीयमित्यत्र वा परिपृच्छसीत्यत्र वा अन्वयः । त्रिः गोपनीयशब्दप्रयोगः गोपनीयत्वस्य वास्तव-त्वसूचकः ।

'सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात्परम् ॥

इतिवत् ।

* क. 'उवाच' नास्ति.
4 b. ग. ङ. पार्वती.

अत्र

'स्त्रीचापलादेतदुदाहृतं मे
धर्मं च वक्तुं तव कः समर्थः ॥' (रा. 3-9-33)

इति सीतावाक्यमनुसन्धेयम् ॥ ५ ॥

दत्ते च सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत् ।
इदं रहस्यं परमं पुरुषार्थप्रदायकम् ॥ ६ ॥

दत्ते -- अनधिकारिभ्यः उपदिष्टे सति सिद्धिहानिः — फलहानिः निष्फलत्वं स्यात् । तस्मादिदं स्तोत्रं यत्नेन गोपयेत् - निगूहेत । इदं परमं रहस्यं अत्यन्तं गोपनीयम् । तत्र हेतुः पुरुषार्थप्रदायकं — पुरुषार्थस्य पुरुषेष्यमाणस्य मोक्षपर्यन्तस्य प्रदायकं प्रदातृ ॥ ६ ॥

पुरुषार्थप्रदायकत्वमेव विशदयति —

धनरत्नौघमाणिक्यं तुरगं च गजादिकम् ।
ददाति स्मरणादेव महामोक्षप्रदायकम् ॥ ७ ॥

गोपालस्तोत्रं स्मरणादेव स्मरणमात्रेण धनं रत्नौघः रत्नसमूहः माणिक्यं अश्वः गजादिश्चेत्येतत् ऐहिकं फलं ददाति -प्रयच्छति । तथा महामोक्षप्रदायकम् — भगवत्प्राप्तिरूपस्य महामोक्षस्य प्रदायकम् । स्वात्मप्राप्ति-रूपकैवल्याख्यमोक्षस्य व्यावृत्तये महदिति विशेषणम् ॥ ७ ॥

तत्तेऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये ।
योऽसौ निरञ्जनो देवः चित्स्वरूपी जनार्दनः ॥ ८ ॥

7 ab. ख. माणिक्यतुरङ्गम्.
7 b ग. ङ. तुरङ्गमगजादिकम्.
8 b. ग. शृणुष्वावहितं प्रिये.

संसारसागरोत्तारकरणाय नृणां सदा ।
श्रीरङ्गादिकरूपेण त्रैलोक्यं व्याप्य तिष्ठति ॥ ९ ॥

**तत्**—पुरुषार्थप्रदायकं गोपालस्तोत्रम्, **ते**—तुभ्यम् **अहं संप्रवक्ष्यामि**—सम्यक् यथा ते बोधो भवेत् तथा वक्ष्यामि । अतः हे **प्रिये** ! **अवहिता** अवधानयुक्ता **शृणुष्व** । **योऽसौ**—प्रसिद्धः, **निरञ्जनः**—निर्दोषः **चित्स्वरूपी जनार्दनः**—जनानां प्रतिकूलजनानां अर्दयिता, जनान् अर्दयतीति व्युत्पत्तेः । अर्दयिता इत्यस्य गमयिता नरकादिगमयिता इत्यर्थः । अर्दधातोः नन्द्यादित्वात् ल्युः कर्तरि । अथ वा अनुकूलजनैः स्वाभिलषितमर्थ्यमानः याच्यमान इत्यर्थः । 'अर्द गतौ याच्ञायां च' इति धातुः । जनार्दनशब्दो विष्णुपर्यायः । **नृणां**—मनुष्याणाम्, **संसारसागरोत्तारकरणाय**—संसाराख्यसमुद्रादुत्तारणाय । **श्रीरङ्गादिकरूपेण**—श्रीरङ्गादिक्षेत्ररूपेण, विद्यमानम् **त्रैलोक्यं**—लोकत्रयम् व्याप्य वर्तते । अथ वा त्रैलोक्यं व्याप्य स्थितः जनार्दनः श्रीरङ्गाद्यधिष्ठातृरङ्गनाथादिरूपेण वर्तते । श्रीगङ्गाद्रवरूपेणेति पाठे, श्रीगङ्गादिप्रवाहरूपेण सर्वोत्तारणाय भगवान् व्याप्तोऽस्तीत्यर्थः ॥ ८-९ ॥

ततो लोका महामूढा विष्णुभक्तिविवर्जिताः ।
निश्चयं नाधिगच्छन्ति पुनर्नारायणो हरिः ॥ १० ॥

**ततः**—तथापि **लोकाः**—जनाः, **महामूढाः**—अत्यन्ताविवेकिनः, **विष्णुभक्तिविवर्जिताः**—विष्णौ भक्तिरहिताः, **निश्चयं**—भगवान् विष्णुः स्तोतव्य इति निर्णयम्, **नाधिगच्छन्ति**—न प्राप्नुवन्ति । अतः पुनः—

---

9 ab. क. सागरात्तोर्णकारणाय.
9 b. ख. कारणाय सदा नृणाम्.
9 c. क. ङ... | श्रीगङ्गाद्रवरूपेण.
ग. श्रीगङ्गादिव्यरूपेण.
10 a. ङ. ततो लोका महाभराः.
10 c ङ. नाधिगच्छेति.

पुनरपि, **नारायणः** – सर्वव्यापी, **हरिः** – स्वाश्रितानां पापं हरतीति तादृशः विष्णुः ॥ १० ॥

निरञ्जनो निराकारो भक्तानां प्रीतिकामदः ।
वृन्दावनविहाराय गोपालं रूपमुद्वहन् ॥ ११ ॥

**निरञ्जनः** — अविद्यादिदोषसम्बन्धरहितः । **निराकारः** — आत्मस्वरूपे आकाररहितः, प्राकृताकाररहित इति वा । **भक्तानां** — प्रीत्या सेवमानानाम्, **प्रीतिकामदः** प्रीत्या अभीष्टफलप्रदस्सन्, **वृन्दावनविहाराय** — वृन्दावनसंज्ञके मधुरासमीपस्थे वनविशेषे विहाराय सञ्चाराय, **गोपालं** — गवां पालकम्, **रूपं** – दिव्यमङ्गलविग्रहम्, **उद्वहन्** — धारयन्, उद्गिरन्निति पाठे प्रकटीकुर्वन् । आत्मस्वरूपे आकारशून्यत्वात् भजनायोग्यत्वमनुसन्धाय भक्ताभीष्टफलप्रदानार्थं गोपालकृष्णरूपं स्वीकरोतीति भावः । 'श्रीमद्वृन्दावनं नाम वनं त्रिदशपूजितम्' इत्यादिपुराणवचनात् वृन्दावनमिति वनविशेषस्य संज्ञा ॥ ११ ॥

मुरलीवादनाधारी राधायै प्रीतिमावहन् ।
अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः ॥ १२ ॥
श्रीकृष्णचन्द्रो भगवान् नन्दगोपवरोद्यतः ।
धरणीरूपिणीमातृयशोदानन्ददायकः ॥ १३ ॥

मुरलीसंज्ञकः यः वादनाविशेषः तद्धरणशीलः । **राधायै** — राधायाः प्रीतिं सन्तोषम्, **आवहन्** – जनयन् राध्यते आराध्यते श्रीकृष्णप्राप्त्यर्थं सर्वै-

---

11 b. ङ. प्रीतिकारकः.
11 d. क. ङ. रूपमुद्गिरन्.
11 d. ग. गोपालं रूपमुत्तमम्.
12 b. ग. राधायाः प्रीतिमावहन्.
13 d. क. माता यशोदा नन्दगेहके.
ख. माता.
13 d. ख. ग. यशोदानन्ददायिनी.

रिति राधा, तदाराधनं विना कृष्णप्राप्तेर्दुर्लभत्वात्। राध्यते वशीक्रियते श्रीकृष्णेनेति वा राधा। तस्यै तस्याम्। सप्तम्यर्थे चतुर्थी। प्रीतिमासमन्तात् वहन्। तस्यामतिप्रीतिमानित्यर्थः इति वा। **अंशांशेभ्यः** — अंशतः अंशतश्च, **समुन्मील्य** — विकासं प्राप्य, **पूर्णरूपकलायुतः** — परिपूर्णाभिः कलाभिः युक्तः, **श्रीकृष्णचन्द्रः** — चन्द्रसदृशः श्रीकृष्णः श्यामसुन्दरमूर्तिः, अनेन इतरावतारापेक्षया कृष्णावतारस्य परिपूर्णत्वं सूच्यते। **भगवान्** — षाड्गुण्यपूर्णः।

'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥'

(वि. पु. 6-5-79)

इति विष्णुपुराणवचनमत्रानुसन्धेयम्। **नन्दगोपवरोद्यतः** — नन्दाख्यो यो गोपवरो गोपालश्रेष्ठः तस्मिन् उद्यतः आसक्तः। अथ वा नन्दाख्यस्य गोपस्य वरप्रदाने उत्सुकः। नन्दगोपस्य वराय ब्रह्मदत्तं वरं सफलयितुमुद्यतः प्रवृत्त इति वा। **धरणीरूपिण्याः** — भूदेवीरूपिण्याः, **मातुः** — यशोदायाः, **आनन्ददायकः** — स्वकीयैर्बाल्यचेष्टितैः आनन्दप्रदाता॥ १२-१३॥

**द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेवतः।**
**ब्रह्मणाभ्यर्थितो देवो देवैरपि सुरेश्वरि॥ १४॥**

**जातोऽवन्यां मुकुन्दोऽपि मुरलीवेदरेचिका।**
**तया सार्धं वचः कृत्वा ततो जातो महीतले॥ १५॥**

---

14 cd. ङ. ब्रह्मणा प्रार्थितो देवः.
14 d. क. सुरेश्वरः.
15 a. क. जातोऽवन्यां च मुदितो.
15 b. क. मुरलीवादनेच्छया.
ग. मुरलीवादरेचकः.
ङ. मुरलीवादरेचिकाः.
15 c. क. श्रिया सार्धं.
15 c. ग. त्वया सार्धं.

**द्वाभ्यां प्रयाचितो नाथः**—

'त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति।
तदायं सुतपा नाम प्रजापतिरकल्मषः॥'

(भाग. १०-३-३२)

इत्यादिना श्रीमद्भागवतोक्तरीत्या पृश्निसुतपोभ्यां प्रार्थितो नाथः—स्वापेक्षित-सिद्ध्यर्थं याचनीयः स्वामी, देवैः ब्रह्मणा च प्रार्थितः—

'ब्रह्मा तदुपधार्याथ सह देवैस्तया सह।
जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः॥'

(भाग. १०-१-१९)

इत्याद्युक्तरीत्या याचितस्सन् हे **सुरेश्वरि! देवेश्वरि! देवक्यां वसुदेवात्** जातः **अवन्यां** भूलोके। **'मुरलीवेदरेचिका'** इति पाठे वेदात् स्वरूप-ज्ञानात् रेचिका वियोजिका प्रच्याविका या मुरली योगमाया। मुरति संवेष्ट-यति विवशं करोतीति मुरः मोहः 'मुर संवेष्टने' इगुपधलक्षणः कः। तं लाति ददातीति व्युत्पत्तेः। तया सार्धं वचः कृत्वा 'गच्छ देवि व्रजं भद्रे' इत्यादिवाक्यमुक्त्वेत्यर्थः। अथ वा **'मुरलीवादरोचकः'** इति पाठः संभाव्यते। मुरलीवादने रोचमानिति तदर्थः। समीचीनं पाठान्तरमन्वेषणीयम्। **'मुरलीवादनेच्छया'** इति पाठस्तु समीचीन एव। तया सार्धं श्रिया सह महीतले जातः भूतलेऽवतीर्णः वचः कृत्वा समालोचनं कृत्वा॥ १४-१५॥

संसारसारसर्वस्वं श्यामलं महदुज्ज्वलम्।
एतज्ज्योतिरहं वेद्यं चिन्तयामि सनातनम्॥ १६॥

**संसारसारसर्वस्वं** संसारे प्रकृतिमण्डले साररूपं सर्वस्वं सर्वविधं स्वम्. **श्यामलम्** नीलमेघवत् श्यामवर्णयुक्तम् **महत्**—अत्यन्तम्, **उज्ज्वलं** देदीप्यमानम्, **एतत्**—पूर्वोक्तम्, **सनातनं**—नित्यम्, **वेद्यं**—ज्ञातव्यम्, **ज्योतिः** राधाकृष्णाख्यं तेजः **चिन्तयामि** ध्यायामि॥१६॥

16 c. क. ग. एतज्ज्योतिरहं वन्द्यं.

गौरतेजो विना यस्तु श्यामतेजस्समर्चयेत् ।
जपेद्वा ध्यायते वापि स भवेत् पातकी शिवे ॥ १७ ॥

हे **शिवे**—पार्वति, **यः गौरतेजः**—राधाख्यं श्वेतं तेजः **विना श्यामतेजः**—श्रीकृष्णाख्यं श्यामलम् तेजः **समर्चयेत्**—पूजयेत् **जपेत्** उपांशु स्तुयात् **ध्यायते वापि**—चिन्तयेद्वा स **पातकी**—पापी भवेत् । राधासहित एव श्रीकृष्णः पूजनीय इत्यर्थः ॥ १७ ॥

स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः ।
एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि ॥ १८ ॥

**ब्रह्महा**—ब्रह्म हन्तीति ब्रह्महा ब्राह्मणहन्ता । सुरां पिबतीति **सुरापी**, सुरापानकर्ता । **स्वर्णस्तेयी**—सुवर्णचोरः चकारात् गुरुस्त्रीगामी । **पञ्चमः**—तैः सहवासी, **एतैः** ब्राह्मणहननसुरापानसुवर्णहरणगुरुभार्यागमनरूपैः तत्सहवासरूपेण दोषेण च भः—राधाविनाकृतकृष्णपूजकः, **विलिप्येत**—विशेषेण सम्बध्येत । **तेजोभेदात्**—तेजसः विभजनात् पृथक्करणाद्धेतोः । अविभक्ततेजोयुगलरूपं श्रीराधासमेतकृष्णं भित्त्वा केवलश्रीकृष्णस्य यः पूजादिकं करोति स पञ्चमहापातकदोषैर्लिप्येतेति भावः । पञ्चमहापातकानि याज्ञवल्क्यस्मृतौ—

'ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः ।
एते महापातकिनो यश्च तैस्सह संवसेत् ॥'

इति प्रोक्तानि ॥ १८ ॥

तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम् ।
तस्मादिदं महादेवि गोपालेनैव भाषितम् ॥ १९ ॥

**तस्मात्**—कारणात् **ज्योतिः**—एकमेव तेजः राधामाधवरूपेण द्विप्रकारमभूत् । **इदं** तत्त्वं गोपालेन कृष्णेनैव **भाषितं**—प्रोक्तम् ॥ १९ ॥

---

18 c क. एतैर्दोषैर्विलीयेत.
19 c क. ग. तस्मादहं महा.

तदेवाह —

दुर्वाससो मुनेर्मोहे कार्तिक्यां रासमण्डले ।
ततः पृष्टवती राधा सन्देहभेदमात्मनः ॥ २० ॥

**दुर्वाससः** — तन्नामकमुनेर्मोहे सति कार्तिक्यां मासे रासक्रीडामण्डले आत्मनः स्वस्य सन्देहभेदं सन्देहविशेषं राधा पृष्टवती ॥ २० ॥

निरञ्जनात्समुत्पन्नं मयाधीतं जगन्मयि ।
श्रीकृष्णेन ततः प्रोक्तं राधायै नारदाय च ॥ २१ ॥

हे **जगन्मयि**—पार्वति **निरञ्जनात्**—भगवतः श्रीकृष्णात् **समुत्पन्नं** — मया तत् अधीतं तदेव श्रीकृष्णेन राधायै नारदाय च प्रोक्तम् । तया च मह्यमुक्तम् ॥ २१ ॥

ततो नारदतस्सर्वे विरला वैष्णवा जनाः ।
कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः ॥ २२ ॥

**ततः** – तदनन्तरम्, **नारदतः** – नारदसकाशात् **विरलाः** — न्यूनसङ्ख्याकाः सर्वे **वैष्णवाः जनाः कलौ** युगे एतत् स्तोत्रं जानन्ति। हे **देवेशि** प्रयत्नतः इदं **गोपनीयं** – गूहनीयम् । न सर्वेभ्यो वक्तव्यम्, विशिष्य चानधिकारिभ्यः ॥ २२ ॥

शठाय कृपणायाथ दाम्भिकाय सुरेश्वरि ।
ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपयेत् ॥ २३ ॥

हे **सुरेश्वरि शठाय** — पुरतः प्रियमुक्त्वा यो गूढं विप्रियं करोति स शठः तस्मै । **कृपणाय** — दीनाय । **दाम्भिकाय** — परवञ्चकाय

---

20 c ग. ततः पृच्छवती.
20 d क. ग. ङ. संदेहं भेदम्.
22 a ख. नारदतः सर्वं.
22 b क. ख. ग. वैष्णवास्तथा.

जनप्रतारणार्थं मिथ्याचारवते चेदं स्तोत्रं न वक्तव्यमिति शेषः। अथ वा शठायेत्यादि चतुर्थी पञ्चम्यर्थे। पूर्वश्लोकस्थेन गोपनीयमित्यनेनान्वेति। विपर्यये दोषमाह — ब्रह्महत्यामवाप्नोतीति। ब्राह्मणहननपापं ब्रह्महत्या। तस्मात् यत्नेन गोपयेत्। अथ वा दाम्भिकायेत्यस्मादनन्तरं दत्त्वेति शेषः। यतः शठादिभ्यो दत्त्वा ब्रह्महत्यामवाप्नोति तस्मात् गोपयेदित्यन्वयः ॥ २३ ॥

**अस्य [1]श्रीगोपालसहस्रनामस्तोत्रमहामन्त्रस्य, श्रीनारद ऋषिः, अनुष्टुप्छन्दः, श्रीगोपालो देवता, कामो बीजम्, माया शक्तिः, चन्द्रः कीलकम्। श्रीकृष्णचन्द्र[2]भक्तिरूपफलप्राप्तये श्रीगोपालसहस्र[3]नामजपे विनियोगः ॥**

अस्य स्तोत्रस्य नारद ऋषिः प्रवर्तकः। द्वात्रिंशदक्षरात्मकमनुष्टुप्छन्दः वृत्तम्। श्रीगोपालः देवता उपास्यः, कामः बीजं सारभूतम्। माया शक्तिः सामर्थ्यम्। चन्द्रः कीलकः परिमाणम्। क्लीमिति बीजम्, ह्रीमिति शक्तिः ग्लौमिति कीलकम्, इत्याहुः। कृष्णे या भक्तिः तत्प्राप्तिसाधनभूते जपे पाठेऽस्य सहस्रनाम्नः विनियोग इत्यर्थः ॥

[4]अथ वा ओं ऐं क्लीं बीजम्, श्रीं ह्रीं शक्तिः श्रीवृन्दावननिवासः कीलकम्, श्रीराधाप्रियं परं ब्रह्मेति मन्त्रः। धर्मादिचतुर्विधपुरुषार्थसिद्ध्यर्थे [5]श्रीगोपालसहस्रनामस्तोत्रजपे विनियोगः।

[6]ओं नारदऋषये नमः — शिरसि १
ओं अनुष्टुप्छन्दसे नमः — मुखे २

---

1. क. ख. घ. ङ. श्रीगोपालसहस्रनामस्तोत्रमन्त्रस्य.
   ग. श्रीगोपालनामसहस्रमन्त्रस्य.
2. ङ. भक्तिजन्यफलप्राप्तये.
3. क. नामस्तोत्रपाठे जपे विनियोगः
4. क. ङ. पुस्तकयोः 'अथवा' इत्यारभ्य 'गोपालचूडामणिः' इत्यन्तो भागो नास्ति.
5. ख. गः घ. 'श्रीगोपालसहस्रनामस्तोत्र' नास्ति.
6. ख. ग. घ. 'ओं नारदऋषये नमः ... ... गोपीजनवल्लभाय स्वाहा' इति भागो नास्ति.

| | | | |
|---|---|---|---|
| श्रीगोपालदेवतायै नमः | — | हृदये | ३ |
| ओं क्लीं कीलकाय नमः | — | नाभौ | ४ |
| ओं ह्रीं शक्तये नमः | — | गुह्ये | ५ |
| श्रीं कीलकाय नमः | — | पादयोः | ६ |

ओं क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा — ७

| | | |
|---|---|---|
| ओं क्लां अङ्गुष्ठाभ्यां नमः | — | १ |
| ओं क्लीं तर्जनीभ्यां नमः | — | २ |
| ओं क्लूं मध्यमाभ्यां नमः | — | ३ |
| ओं क्लैं अनामिकाभ्यां नमः | — | ४ |
| ओं क्लौं कनिष्ठिकाभ्यां नमः | — | ५ |
| ओं क्लः करतलकरपृष्ठाभ्यां नमः | — | ६ |
| ओं क्लां हृदयाय नमः | — | १ |
| ओं क्लीं शिरसे स्वाहा | — | २ |
| ओं क्लूं शिखायै वषट् | — | ३ |
| ओं क्लैं कवचाय हुं | — | ४ |
| ओं क्लौं नेत्रत्रयाय वौषट् | — | ५ |
| ओं क्लः अस्त्राय फट् | — | ६ |

[1]अथ मूलमन्त्रन्यासः—

| | |
|---|---|
| ओं क्लीं अङ्गुष्ठाभ्यां नमः | १ |
| ओं कृष्णाय तर्जनीभ्यां नमः | २ |
| ओं गोविन्दाय मध्यमाभ्यां नमः | ३ |
| ओं गोपीजन अनामिकाभ्यां नमः | ४ |
| ओं वल्लभाय कनिष्ठिकाभ्यां नमः | ५ |
| ओं स्वाहा करतलकरपृष्ठाभ्यां नमः | ६ |

इति न्यासः ।

1. ख. ग. घ. 'अथ मूलमन्त्रन्यासः' इत्यारभ्य 'इति हृदयादिन्यासः' इति पर्यन्तो भागः नास्ति ।

अथ हृदयादिन्यासः—

ओं क्लीं हृदयाय नमः — १
ओं कृष्णाय शिरसे स्वाहा — २
ओं गोविन्दाय शिखायै वषट् — ३
ओं गोपीजन वल्लभाय कवचाय हुं — ४
ओं वल्लभाय नेत्रत्रयाय वौषट् — ५
ओं स्वाहा अस्त्राय फट् —

इति हृदयादिन्यासः।

अथ ध्यानम्—

कस्तूरीतिलकं ललाटपटले वक्षस्स्थले कौस्तुभं
नासाग्रे [1]वरमौक्तिकं करतले वेणुं करे कङ्कणम्।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च [2]मुक्तावलिं
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥ १ ॥

ललाटफलकादौ कस्तूरीतिलकादिकं दधानः गोपाङ्गनापरिवेष्टितः गोपालचूडामणिः सर्वोत्कर्षेण वर्तते इत्यर्थः।

[3]फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥ २ ॥

विकसितनीलोत्पलसदृशकान्ति चन्द्रबिम्बोपमास्यं शिखिपिच्छाख्यं शिरोभूषणं प्रियं यस्य तादृशं श्रीवत्सचिह्नम् उदारकौस्तुभाख्यमणिधारकं पीतपरिधानं रुचिरं गोपीनां नेत्रोत्पलैरर्चिता मूर्तिर्यस्य तादृशं गवां गोपालानां च सङ्घैः परिवेष्टितं मधुरवेणुवादनासक्तं दिव्यभूषणयुक्तविग्रहं गोविन्दं श्रीकृष्णं भजे इत्यर्थः ॥ २ ॥

---

1. ग. गजमौक्तिकं.
2. मुक्तावलीं.
3. क. कृष्णन्दीवर.

# अथ गोपालसहस्रनामस्तोत्रप्रारम्भः ।

ओं क्लीं देवः कामदेवः कामबीजशिरोमणिः ।
श्रीगोपालो महापालो वेदवेदान्तपारगः ॥ १ ॥

देवः — क्रीडाशीलः गमनशीलः अनुपमकान्तिमान् दीप्यमानश्च । कामदेवः — सर्वकामप्रदाता, कामान् दीव्यति ददाति इति । अथ वा धर्मादिपुरुषार्थचतुष्टयं वाञ्छद्भिः काम्यत इति कामः, स चासौ देवश्च कामदेवः । कामबीजशिरोमणिः — काम्यमानानां पुरुषार्थानां कारणश्रेष्ठः । श्रीगोपालः — गाः पालयतीति गोपालः, श्रीसहितो गोपालः श्रीगोपालः । गोशब्दः धेनुवाचकः वाग्वाचकश्च । यद्वा श्रियः राधायाः रुक्मिण्याः सत्यभामायाः वा गाः वचांसि पालयति अनुसरतीति श्रीगोपालः । महापालः— महांश्चासौ पालकश्च महापालः । 'महीपाल' इति पाठे महीं पालयतीति महीपालः । वेदानां वेदान्तानां च पारं गच्छतीति वेदवेदान्तपारगः — वेदवेदान्तनिष्णातः वेदवेदाङ्गपारग इति पाठे वेदेषु वेदाङ्गेषु च निष्णात इत्यर्थः । 'वेदान्तकृद्वेदविदेव चाहम्' (गी. 15–15) इति गीतायाम् ॥ १ ॥

कृष्णः कमलपत्राक्षः पुण्डरीकः सनातनः ।
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्वतो मुखः ॥ २ ॥

कृष्णः — भूनिर्वृतिहेतुः भूमेः सुखदायक इत्यर्थः । 'कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः' इति पुराणवचनात् । भक्तानां दुःखानि कर्षति,

1 ab. क. ख. ग. घ. ङ. पुस्तकेषु इदं पादद्वयं नास्ति.
1 c. ख. ग. ङ. महीपालः
1 d. ख. सर्ववेदान्त.
क. ङ. वेदवेदाङ्ग.
ग. सर्ववेदाङ्ग.
2 a. ख. घ. धरणीपालको धन्यः.
2 b. ख. पुण्डरीकं सनातनम्.

निवर्तयतीति वा कृष्णः । कर्षति आकर्षति भक्तानां मन इति वा कृष्णः । नीलमेघश्यामल इति वा । कमलपत्रे इव आयते आह्लादके च अक्षिणी यस्य सः **कमलपत्राक्षः** । **पुण्डरीकः**—अम्भोजवत् कमनीयः । यद्वा हृदयपुण्डरीकाश्रयत्वात् पुण्डरीकः । 'अथ यदिदमस्मिन् ब्रह्मपुरे हृदयं पुण्डरीकं वेश्म' (छा. 8-1-1) इति श्रुतेः । **सनातनः**—नित्यः । **गोपतिः**—वाक्पतिः । गवामिन्द्रियाणां पतिः नियन्ता वा, गोपालको वा । **भूपतिः**—भुवो भर्ता । पालको वा भारापनयनात् । **शास्ता**—श्रुतिस्मृतिभ्यां सर्वेषामनुशासकः । शत्रुनिग्राहको वा । **प्रहर्ता**—शत्रुहन्ता । प्रहर्षेण हरति प्रीत्या स्वीकरोति भक्तानां तुलसीपत्रादिकमिति वा प्रहर्ता । भक्तानां क्लेशं नाशयति इति वा प्रहर्ता ।

'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥' (गी. 9-26)
'अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि' (गी. 18-66)

इति स्मरणात् । **विश्वतोमुखः**—सर्वत्र मुखं यस्य सः । 'अनेकबाहूदरवक्त्रनेत्रम्' (गी. 11-16) इत्युक्तरीत्या अनन्तमुखयुक्तदिव्यमङ्गलविग्रहवानित्यर्थः । 'विश्वतश्चक्षुरुत विश्वतोमुखः' (तै. ना. 14) इति श्रुतिः । विश्वेषां सर्वेषां देवानां मुखमिव प्रधानभूत इति वा । तैरुपास्य इत्यर्थः । 'विश्वे देवा उपासते' (कठ. 5-3) इति श्रुतेः ॥ २ ॥

**आदिकर्ता महाकर्ता महाकालः प्रतापवान् ।**
**जगज्जीवो जगद्धाता जगद्भर्ता जगद्वसुः ॥ ३ ॥**

आदिश्चासौ कर्ता च **आदिकर्ता** । महतः विपुलस्य प्रपञ्चस्य कर्ता **महाकर्ता** । **महाकालः**—प्रलयकाले महान्तं प्रपञ्चं स्वस्मिन् कलयति सङ्कलयति एकीभावयतीति महाकालः । **प्रतापवान्**-परानभिभावनीयत्वं प्रतापः तद्वान् । जगत् जीवयतीति जगज्जीवः सर्वजगत्प्राणनहेतुः । 'को ह्येवान्यात्

3 d. ङ. जगत्कर्ता.

कः प्राण्यात्' (तै. आ. 7 अनु.) इति श्रुतेः। **जगद्धाता**—जगद्धारकः जगत्पोषको वा। **जगद्भर्ता**–जगतः स्वामी। **जगद्वसुः** – जगति वसति अन्तर्यामितया तिष्ठतीति जगद्वसुः॥ ३॥

मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान्।
नारायणो हृषीकेशो गोविन्दो गरुडध्वजः॥ ४॥

**मत्स्यः** — वेदोद्धाराय स्वीकृतमत्स्यरूपः। **भीमः** — बिभ्यति सर्वेऽस्मादिति भीमः। 'भीमादयोऽपादाने' (पा. सू. ३–4–74)। अभीम इति वा च्छेदः। सन्मार्गवर्तिनामभयङ्कर इत्यर्थः। **कुहूभर्ता** — उदये अमायोगान्नष्टचन्द्रकला सा अमा कुहूः तस्याः भर्ता। **हर्ता** – आश्रितानां पापं हरतीत्यर्थः। **वाराहमूर्तिमान्** — वराहरूपी। **नारायणः** — नरात भगवतो जातानि तत्त्वानि नाराणि अयनं यस्य सः सर्वान्तर्यामीत्यर्थः। **हृषीकेशः** — हृषीकाणामिन्द्रियाणामीशः नियामकः।

तदुक्तं हरिवंशे—

'हृषीकाणीन्द्रियाण्याहुस्तेषामीशो यतो भवान्।
हृषीकेशस्ततो विष्णुः ख्यातो देवेषु केशवः॥'

इति। **गोविन्दः** गाः स्तुतिवाक्यानि विन्दते प्राप्नोतीति गोविन्दः। स्तुतिगीविषय इत्यर्थः। गरुडः ध्वजः यस्य सः **गरुडध्वजः**। गरुडचिह्नितो ध्वजपटो यस्येति वा॥ ४॥

गोकुलेन्द्रो महीचन्द्रः शर्वरीप्रियकारकः।
कमलामुखलोलाक्षः पुण्डरीकः शुभावहः॥ ५॥

**गोकुलेन्द्रः** — गोकुलाधिपतिः। **महीचन्द्रः** — मह्याः भूमेः चन्द्रः आह्लादकः। **शर्वरीप्रियकारकः** – शर्वर्यां रात्रौ प्रियं करोतीति तादृशः। दिवा

4 a. ग. कुहूः कर्ता.
5 a. ख. ग. महाचन्द्रः
5 d. ग. पुण्डरीकसुखावहः

सूर्यतप्तानां चन्द्ररूपेण रात्रौ प्रियं करोतीत्यर्थः। यद्वा दिवा गोचारणाय गतस्य स्वस्य विरहेण तप्तानां गोपीनां रात्रौ स्वसंयोगेन प्रियं करोतीति तादृशः। **कमलामुखलोलाक्षः**—कमलायाः लक्ष्म्याः मुखे विषये लोले तरले अक्षिणी यस्य सः। कमलामुखदर्शनासक्तनेत्र इत्यर्थः। **पुण्डरीकः**—पुण्डरीकसदृशः। **शुभावहः**—भक्तानां मङ्गलप्रदः॥ ५॥

दुर्वासाः कपिलो भौमः सिन्धुसागरसङ्गमः।
गोविन्दो गोपतिर्गोपः कालिन्दीप्रेमपूरकः॥ ६॥

**दुर्वासाः**—महर्षिविशेषरूपः। दूर्वाश इति पाठे ब्रह्मणा वत्सापहरणकाले स्वयमेव कृष्णः वत्सरूपेण दूर्वामश्नातीति दूर्वाशः। कामधेनुरूपेण वा दूर्वाशः। 'धेनूनामस्मि कामधुक्' (गी. 10–18) इति गीतावचनात्। **कपिलः**—कपिलवर्णः, कपिलाख्यऋषिरूपी वा। कं जलं पिबतीति कपिः सूर्यः, तस्मै लाति स्वतेजो ददातीति वा कपिलः। 'यदादित्यगतं तेजः' (गी. 15-12) इति स्मरणात्। **भौमः**—भूमौ भवः अवतीर्णः। **सिन्धुसागरसङ्गमः**—सिन्धुसमुद्रौ सङ्गमयतीति तादृशः। **गोविन्दः**—चतुर्थश्लोके विवृतोऽयं शब्दः। **गोपतिः**—वाक्पतिः सकलवाङ्निर्वाहकः। **गोपः**—गोपालकः। **कालिन्दीप्रेमपूरकः**—कालिन्द्याः यमुनायाः प्रेम्णः प्रीतेः पूरकः। तज्जलक्रीडादिना वर्धकः॥ ६॥

गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः।
नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः॥ ७॥

गोपानां गोपालानां स्वामी **गोपस्वामी**। गोकुलस्येन्द्रः अधिपतिः **गोकुलेन्द्रः**। **गोवर्धनवरप्रदः**—गोवर्धनाख्यस्य पर्वतस्य वरं ददातीति तादृशः। कुपितेनेन्द्रेणाविच्छेदेन वर्षणे कृते सति तस्याभयप्रदः कृष्णः इति

---

6 c. क. ख. घ. गोपतिर्गोत्रः, ग. गोपतिर्गोप्ता, ङ. गोपतिर्गोत्रम्।
7 a. क. गोगोस्वामी 7 a. ग. गोस्वामी गोकुलेन्द्रो गोगोवर्धन...
7 d. ङ. दारिद्रभञ्जकः

पुराणप्रसिद्धम् । गोवर्धनरूपेण ईप्सितप्रदो वा । नन्दप्रभृतीनां गोकुल-निवासिनां रक्षकः नन्दादिगोकुलत्राता । नन्दादीनां गोसमूहस्य च त्रातेति वा । **दाता**—पुरुषार्थचतुष्टयस्य । **दारिद्र्यभञ्जनः**—कुचेलादीनां दारिद्र्यस्य नाशकः ॥ ७ ॥

> **सर्वमङ्गलदाता च सर्वकामप्रदायकः ।**
> **आदिकर्ता महीभर्ता सर्वसागरसिन्धुजः ॥ ८ ॥**

**सर्वमङ्गलदाता**—सर्वेषां मङ्गलानां प्रदाता । **सर्वकामप्रदायकः**—सर्वेषां कामानां इच्छाविषयफलानां प्रदाता । प्रथमसृष्टिकर्ता **आदिकर्ता** । आदिर्मुख्यश्चासौ कर्ता च संहारकश्चेत्यादिकर्तेति वा । 'कृञ् हिंसायाम्' इति धातोः । 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः' (कठ. 2–25) इति श्रुतेः । **महीभर्ता** भूदेवीपतिः । **सर्वसागरसिन्धुजः** सर्वेषु सागरेषु सिंधुषु च जायते मत्स्यादिरूपेणेति तादृशः ॥ ८ ॥

> **गजगामी गजोद्धारी कामी कामकलानिधिः ।**
> **कलङ्करहितश्चन्द्रो बिम्बास्यो बिम्बसत्तमः ॥ ९ ॥**

गज इव गच्छतीति गजगामी । गजेन गच्छतीति वा गजगामी ।

> 'स्त्रीभिर्नरैश्च सानन्दं लोचनैरभिवीक्षितौ ।
> जग्मतुर्लीलया वीरौ मत्तौ बालगजाविव ॥' (वि. पु. 5–19–13)

इति विष्णुपुराणे ।

> 'इच्छामो हि महाबाहुं रामं राजीवलोचनम् ।
> गजेन महता यान्तं रामं छत्रावृताननम् ॥' (रा. 2-2–22)

इति रामायणे । **गजोद्धारी**—गजस्य महाह्रदे भगवत्पादयोः समर्पणार्थं पद्ममवचेतुमवगाहनसमये नक्राक्रान्तस्य गजेन्द्रस्य 'आदिमूल' इत्युच्चै-

---

8 b. क. सर्वकामवरप्रदः

राहूयमानस्योद्धर्ता । **कामी** — गोपीकामुकः । **कामकलानिधिः** — कामशास्त्रस्य खनिः कामशास्त्रनिपुण इत्यर्थः । रासक्रीडादौ प्रसिद्धमेतत् । यद्वा कामकलानिधिः — कामकलानां निधिराधारः । सिंहविक्रमादयः षोडशविधाः स्नानादयः, षोडशशृङ्गाराः, आश्लेषादीन्यष्टौ, मैथुनानि आभ्यन्तरो बाह्यश्चेति द्विविधो रतिभेदः, श्रवणादिचतुर्विधं दर्शनम्, विभावादयः पञ्चभावाः, हेलादयस्त्रयोदश हावा इति चतुष्षष्टिः कामकलाः कामशास्त्रोक्ताः, तासां निधिराधारः इत्यर्थः । **चन्द्रबिम्बास्यः** — चन्द्रबिम्बमिव मुखं यस्य सः । मुखस्य चन्द्रबिम्बसदृशत्वे चन्द्रबिम्बवत् कलङ्कवत्त्वमपि स्यात् इत्याशङ्क्याह— **कलङ्करहित** इति । यद्वा कलङ्करहितः दोषशून्यः । चन्द्रः सर्वाह्लादकः । 'नक्षत्राणामहं शशी' (गी. 10–21) इत्युक्तेः । **बिम्बसत्तमः** — बिम्बेषूत्कृष्टः, प्रतिमादावतिशयेन सन्निहित इति वा ॥ ९ ॥

> **मालाकारः कृपाकारः कोकिलस्वरभूषणः ।**
> **रामो नीलाम्बरो देवो हली दुर्दममर्दनः ॥ १० ॥**

मालाकारकृपाकार इति पाठः साधुः । मालाकारे कृपां करोतीति तादृशः । **मालाकारः** पुष्पमालानिर्माणवृत्तिः मालाकारानाभा कश्चित् श्रीकृष्णेन पुष्पाणि याचितः अतिप्रहृष्टवदनः पुष्पाणि ददौ । तेन प्रसन्नः श्रीकृष्णः तस्मै सर्वाभीष्टवरान् ददौ इति पुराणे प्रसिद्धम् ।

> 'मालाकाराय कृष्णोऽपि प्रसन्नः प्रददौ वरान् ।
> श्रीस्त्वां मत्संश्रया भद्र न कदाचित्त्यजिष्यति ॥'

इत्यादि विष्णुपुराणे । **कोकिलस्वरभूषणः** — कोकिलस्य स्वर इव स्वरः कोकिलस्वरः सः भूषणमलङ्कारो यस्य सः । **रामः** — लोकरमणः बलराम इत्यर्थः । नीलं अम्बरं वस्त्रं यस्य स **नीलाम्बरः** । बलरामस्य नीलाम्बरत्वं

10. a ग. ङ. मालाकारकृपाकारः
10. b ख. घ. कोकिलास्वर-
10 d ग. ङ. दुर्दाममर्दनः

पुराणेष्वन्वेषणीयम्। देवः क्रीडमानः द्योतमानो वा। हली — हलायुधधारी दुर्दमर्दनः—दुःखेन दमयितव्यानामसुराणां मर्दनः हिंसकः। जरासन्धवधादौ प्रसिद्धं बलरामपौरुषम्।

'जग्राह विरथं रामो जरासन्धं महाबलम्।
हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा॥'

इति भागवते (१०-५०-३१) ॥ १० ॥

**सहस्राक्षपुरीभेत्ता महामारी विनाशनः।**
**शिवः शिवतमो भेत्ता बलारातिप्रपूजकः॥ ११ ॥**

**सहस्राक्षपुरीभेत्ता** — सहस्राक्षः इन्द्रः तस्य पुरी अमरावती तस्याः भेत्ता। **महामारी** — महतः दुर्दान्तान् दानवादीन् मारयतीति तादृशः। **विनाशनः** — शत्रुहन्ता प्रलये सर्वसंहारक इति वा। **शिवः** — मङ्गलस्वरूपः। **शिवतमः** — मङ्गलेषूत्कृष्टः। **भेत्ता** — शत्रुतदीयविदारकः भक्तानामापद्विनाशको वा। **बलारातिप्रपूजकः** — बलस्य तन्नामकस्यासुरस्य अरातिः शत्रुः इन्द्रः, तस्य पूजकः सत्कारकः इन्द्रानुजत्वात्॥ ११ ॥

**कुमारीवरदायी च वरेण्यो मीनकेतनः।**
**नरो नारायणो धीरो राधापतिरुदारधीः॥ १२ ॥**

कुमारीणां गोपकन्यकानाम् वरदायी — वरप्रदः। **वरेण्यः** — वरणीयः उपायत्वेन उपेयत्वेन च भक्तैः प्रार्थनीयः। स्वरूपेण कल्याणगुणैर्दिव्यमङ्गलविग्रहेण च ब्रह्मादिभिराश्रयणीय इति वा। **मीनकेतनः** — मकरध्वजः मन्मथः। 'साक्षान्मन्मथमन्मथः'। प्रद्युम्नाख्यावतारविशेषो वा। नरः 'नृ नये' इत्यस्माद्धातोः पचाद्यच्। भक्तानामभीष्टं वरं प्रापयतीत्यर्थः। 'नरतीति नरः प्रोक्तः परमात्मा सनातनः'। इति महाभारते। न रीयते क्षीयत इति वा

---

11. d क. ङ. बलारातिप्रयोजकः
12. d क. धरापतिरुदारधीः
ङ. धीरापतिरुदारधीः

नरः निर्विकारः । **नारायणः**—नरः पुरुषः परमात्मा ततो जातानि आकाशादीनि तत्त्वानि नाराणि तानि अयं व्याप्नोतीति नारायणः ।

'यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥
(ना. उ. 13–1–2)

'नराज्जातानि तत्त्वानि नाराणीति ततो विदुः ।
तान्येन चायनं तस्य तेन नारायणः स्मृतः ॥' (महाभारते)

**धीरः**—चाञ्चल्यरहितः पराक्रमशाली । यद्वा धियं राति ददातीति धीरः बुद्धिप्रदः । धियमीरयति प्रेरयति इति धीरः बुद्धिप्रेरक इति वा । **राधापतिः**—राधायाः भर्ता । **उदारधीः**—उदारा सर्वार्थविषयत्वेन प्रकृष्टा धीः बुद्धिः यस्य सः । **धीरापतिरिति** पाठे धीराणामकामपराणामासमन्तात् पतिः पालक इत्यर्थः ॥ १२ ॥

**श्रीपतिः श्रीनिधिः श्रीमान् मापतिः प्रतिराजहा ।**
**बृन्दापतिः कुलग्रामी धामी ब्रह्म सनातनः ॥ १३ ॥**

**श्रीपतिः**—लक्ष्मीपतिः । 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' । अमृतमथने सर्वान् सुरासुरादीन् विहाय श्रीरेनं पतित्वेन वरयामासेति भागवते प्रसिद्धम् । रत्नमञ्जरीव मञ्जूषायां श्रीरस्मिन्निहितेति **श्रीनिधिः** । श्रियः शोभायाः निधिराश्रय इति वा । **श्रीमान्**—नित्ययोगे मतुप्, श्रिया नित्याऽङ्कितवक्षाः । 'नित्या श्रीर्विष्णोरेषानपायिनी' (वि. पु. 1–9–144) । **मापतिः** लक्ष्मीपतिः । **प्रतिराजहा**—शत्रुभूतानां राज्ञां हन्ता । **बृन्दापतिः** ापतिः, बृन्देति राधाया अपरं नामेति वाचस्पत्ये । **कुलग्रामी**—गोकुलाग्रामस्वामी । **धामी**—तेजस्वी । परम[illegible]स्वामीति वा ।

13. c ग. कुलस्वामी
13. d ङ. धाम ब्रह्म

SRI VENKATESWARA CENTRAL LIBRARY & RESEARCH CENTRE TIRUPATI. 23213

**ब्रह्म**—स्वरूपेण गुणैश्च बृहत् उत्कृष्टः । **सनातनः**—सर्वदा विद्यमानः नित्यः ॥ १३ ॥

**रेवतीरमणो रामः प्रियश्चञ्चललोचनः ।**
**रामायणशरीरोऽयं रामो रामः श्रियः पतिः ॥ १४ ॥**

**रेवतीरमणो रामः**—रेवत्याः पतिः बलरामः । **प्रियः**—परमप्रेमास्पदभूतः । **चञ्चललोचनः**—चञ्चले तरले लोचने नेत्रे यस्य सः । **रामायणशरीरः**—रामायणं शरीरं यस्य सः रामायणस्य आत्मभूतः प्राधान्येन रामायणप्रतिपाद्य इत्यर्थः । यद्वा रामाणां सुन्दरीणां स्त्रीणामयनं प्राप्यं शरीरमस्येति रामायणशरीरः । **रामः**—रमन्ते योगिनोऽस्मिन्निति रामः दशरथपुत्रः रामः । रम्यत इति वा रामः । अधिकरणे करणे वा घञ् ।

'रमन्ते योगिनो यस्मिन् चिदानन्दे चिदात्मनि ।
इति रामपदेनैतत् परं ब्रह्माभिधीयते ॥' (पद्मपुराणे)

'रम्यन्तेऽस्मिन् सदा सर्वैर्गुणरूपवशीकृतैः'

इत्यादिकमत्र भाव्यम् । **श्रियः पतिः** लक्ष्म्याः भर्ता ॥ १४ ॥

**शार्वरः शार्वरी शार्वः सर्वत्र शुभदायकः ।**
**राधाराधयिताराधी राधाचित्तप्रमोदकः ॥ १५ ॥**

**शार्वरः** 'शॄ हिंसायाम्' इति धातोः कॄगॄशॄवञ्चतिभ्यः ष्वरच्' (उ.सू. 286) इति ष्वरच् । भगवद्भक्तस्य ये शत्रवः तेषां हिंसक इत्यर्थः ।

'तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम्' (रा. 3–30–39)

इति रामायणे । भक्तानामशुभं हिनस्तीति वा अर्थः ।

'त्वदङ्घ्रिमुद्दिश्य कदापि केनचित् सकृत्कृतो वापि यथा तथाञ्जलिः ।
तदैव मुष्णात्यशुभान्यशेषतः शुभानि पुष्णाति न जातु हीयते ॥'

---

14 ab. ग. रेवतीरमणश्चन्द्रश्चञ्चलश्चारुलोचनः
14 b. ख. घ. चञ्चलश्चारुलोचनः, 14 c ग. नारायणशरीरोऽयं
14 d. ख. ग. ङ. रामी रामः
15 a ग. ङ. सर्वः 15 c ख. घ. ग. राधाराधायितो राधी.

इति स्तोत्ररत्ने। **शर्वरी**—रात्रिः। संसारिणां भगवद्विमुखानां रात्रिवदप्रकाशमानः। 'या निशा सर्वभूतानाम्' इति गीतायाम्। **शर्वः** 'शॄ हिंसायाम्' इति धातोः 'सर्व–निघृष्व .... .... (उ. सू. 159) इति वन्। आश्रितानामशुभं निवर्तयतीत्यर्थः। अथ वा प्रलयकाले सर्वजगत्संहारक इत्यर्थः। **सर्वत्र शुभदायकः** भक्तानां सर्वेषु देशेषु कालेषु वा शुभदाता। **राधाराधयिता**—राधायाः प्रीणनः। **आराधी**—आराधकः भक्तचित्तसंतोषणः। आराधयति संमानयति विप्रादीन् भक्तानित्याराधी। राधी इति वा च्छेदः। राधा अस्यास्तीति राधी राधापतिः। **राधाचित्तप्रमोदकः**—राधायाश्चित्तं प्रमोदयतीति तादृशः॥ १५॥

**राधारतिसुखोपेतः राधामोहनतत्परः।**
**राधावशीकरो राधाहृदयाम्भोजषट्पदः॥ १६॥**

**राधारतिसुखोपेतः**—राधासङ्गमजन्यसुखमुक्तः। **राधामोहनतत्परः** राधायाः प्रीणने सक्तः। **राधावशीकरः**—राधायाः स्ववशं नेता। राधायाः हृदयमेवाम्भोजं पद्मं तत्र विद्यमानः षट्पदः भ्रमरः राधाहृदयनिवासीत्यर्थः॥ १६॥

**राधालिङ्गनसंमोहः राधानर्तनकौतुकः।**
**राधासञ्जातसंप्रीतो राधाकाम्यफलप्रदः॥ १७॥**

**राधालिङ्गनसंमोहः**—राधायाः संश्लेषेणानुरागवान्। **राधानर्तनकौतुकः**—राधाकर्तृकनर्तने कौतुकं प्रीतिर्यस्य सः। **राधासञ्जातसंप्रीतः** राधाविषये सञ्जाता संप्रीतिर्यस्य सः। राधासञ्जातसंप्रीतिरिति पाठस्तु साधुः। **राधाकाम्यफलप्रदः**—राधायाः अभीष्टफलदाता॥ १७॥

---

16. ग. अयं श्लोकः नास्ति।
17. ग. अयं श्लोकोऽपि नास्ति।
17. a ङ. संमोदः
17. c ख. संप्रीती
ङ. संगतिसंप्रीतः
17. d ख. कामफल.

**बृन्दापतिः कोशनिधिः कोकशोकविनाशनः ।**
**चन्द्रापतिः चन्द्रपतिः चण्डकोदण्डभञ्जनः ॥ १८ ॥**

**बृन्दापतिः**—बृन्दावनाधिपतिः, राधापतिरिति वा । **कोशनिधिः**—योगिभिर्हृदयगुहायां निधीयमानः । योगिध्येय इति यावत् । 'आत्मा गुहायां निहितोऽस्य जन्तोः' (तै. ना. 66) इत्युक्तरीत्या सर्वेषां हृदयगुहायां निहित इति वा अन्नमयादिकोशाधार इति वा । **कोशशोकविनाशनः**—कोकानां चक्रवाकानां शोकापहन्ता । **चन्द्रापतिः**—लक्ष्मीपतिः, चन्द्रायाः चन्द्रवत्याः सख्याः पतिरिति वा । **चन्द्रपतिः**—चन्द्रस्य स्वामी । **चण्डकोदण्डभञ्जनः** भीषणस्य धनुषः भङ्गकर्ता । रामावतारे कृतो धनुर्भङ्गोऽत्र विवक्षितः ॥ १८ ॥

**रामो दाशरथी रामः भृगुवंशसमुद्भवः ।**
**आत्मारामो जितक्रोधो मोहो मोहान्धभञ्जनः ॥ १९ ॥**

**रामः** कृष्णस्य ज्येष्ठभ्राता बलरामः । **दाशरथिः**—दशरथपुत्रः रामः । **भृगुवंशसमुद्भवः**—भृगुकुलोत्पन्नः परशुरामः । **आत्मारामः**—आत्मैव आरामः उद्यानं यस्य सः । उद्यानवत् आत्मैव सुखवर्धको यस्य स इत्यर्थः । यद्वा आत्मना राधया सह आरामोऽस्येति आत्मारामः ।

'आत्मा तु राधिका तस्य तयैव रमणादसौ ।
आत्माराम इति प्रोक्तो मुनिभिर्गूढवेदिभिः ॥'

इति स्कन्दपुराणवचनात् । **जितक्रोधः** जितः क्रोधः येन सः क्रोधाभाववान् । **मोहः**—मोहनः । भक्तेषु व्यामोहयुक्त इति वा । **मोहान्धभञ्जनः**—अज्ञानान्धानां रक्षसाम् असुराणां च विनाशकः ॥ १९ ॥

18 a क. कोकनिधि:
18 b घ. लोकशोकविनाशक:
ख. कोकशोकविनाशक
[illegible]

वृषभानुभवो भावः काश्यपिः करुणानिधिः ।
कोलाहलो हली हाली हेली हलधरप्रियः ॥ २० ॥

**वृषभानुभवः** — वृषभतुल्यस्य बलरामस्यानुजः । यद्वा वृषभानोर्भवो जन्मास्येति वृषभानुभवः राधात्मा । 'राधा कृष्णात्मिका नित्यं कृष्णो राधात्मको ध्रुवम्' इत्युक्तेः । यद्वा वृषभस्य वृषरूपेणागतस्यासुरस्य विषये अनुभवो यस्य सः वृषभानुभवः । प्रपञ्चरूपेण भवतीति **भावः** । भावयति प्रापयति तत्तत्कर्मफलमिति वा भावः । **काश्यपिः** — कश्यपस्यापत्यम् । कश्यपस्य अदित्यां वामनरूपेणावतीर्णत्वात । **करुणानिधिः** — दयानिधिः । करुणा नाम स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षा । **कोलाहलः** — कोलः 'कुल-संस्त्याने बन्धुषु च' इति धातोः भावे घञ् । बन्धुतानुकूलो व्यापारः कोलः तं आसमन्तात् हलति कृषति उत्पादयति भक्तानां स्वविषये इति कोलाहलः । भक्तविषये बन्धुतानुकूलं व्यापारं करोतीति वा । **हली** — हलायुधधारी । **हाली** — हाला मद्यमस्यास्तीति मद्यपः, सन्तुष्ट इत्यर्थः । **हेली** — शृङ्गारात भावाच्च जाताः विलासाः हेलाः तद्वान् । **हलधरप्रियः** — हलायुधधारिणो बलरामस्य प्रीतिपात्रभूतः ॥ २० ॥

राधामुखाब्जमार्ताण्डः भास्करो रविजा विधुः ।
विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥ २१ ॥

**राधामुखाब्जमार्ताण्डः** — राधायाः मुखरूपपद्मस्य विकासकः सूर्यः । **भास्करः** — भाः दीप्तिं करोतीति । सूर्यादितेजसां प्रकाशकानामपि प्रकाशक

20. a ख. घ. ग. वृषभानुर्भवो
ङ. भवो भावी
20. c ग. ङ. हली हालो
20. d क. हेला हल
ग. ङ. हली हलधरः
21 a क. मार्तण्डः
21 b क. ग. ङ. रविजो विधुः
ख. घ. शिरजो विधुः
21 d ग. वारुणप्रियः

इत्यर्थः। 'तस्य भासा सर्वमिदं विभाति' (मु. 2-2-10) इति श्रुतेः। **रविजाः**—सूर्यवंश्यः। **विधुः**—विष्णुः। 'विधुः श्रीवत्सलाञ्छनः' इत्यमरः। चन्द्ररूपो वा 'नक्षत्राणामहं शशी' (गी. 10-21) इत्युक्तः। **विधिः**—हितानुशासकः। **विधाता**—ब्रह्मादिस्तम्बपर्यन्तसर्वस्रष्टा कर्मणां तत्फलानां च कर्तेति वा। 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे. 6-18) **वरुणः**—सर्वस्यावारकः सर्वव्यापी। 'वृञ् वरणे' इति धातोः 'कृवृदारिभ्य उनन्' (उ. सू. 3.10) इत्युनन् प्रत्ययः। 'येनावृतं खं च दिवं महीं च' (तै. ना. 3) इत्यादिवचनमत्रानुसन्धेयम्। यद्वा वरुणः प्रचेतोरूपः। 'वरुणो यादसामहम्' (गी. 10-29) इति गीतावचनात्। **वारुणः** वरुणस्यापत्यं वसिष्ठोऽगस्त्यो वा तद्रूप इत्यर्थः। **वारुणीप्रियः**—वारुणीं दूर्वा सुरा वा सा प्रिया यस्य सः। दूर्वादलप्रतिमकान्तियुक्तलक्ष्मीप्रिय इति वा ॥ २१ ॥

**रोहिणीहृदयानन्दो वसुदेवात्मजो बली।**
**नीलाम्बरो रौहिणेयो जरासन्धवधोऽमलः ॥ २२ ॥**

**रोहिणीहृदयानन्दः**—रोहिण्याः हृदयस्य आनन्दनः। रोहिणी बलरामस्य माता। **वसुदेवात्मजः**—वसुदेवस्य पुत्रः। **बली**—बलरामः। **नीलाम्बरः**—नीलमम्बरं यस्य सः। **रौहिणेयः**—रोहिणीपुत्रः। **जरासन्धवधः**—जरासन्धस्य हन्ता। **अमलः**—निर्दोषः ॥ २२ ॥

**नागो नवाम्भो विरुदो वीरहा वरदो बली।**
**गोपथो विजयी विद्वान् शिपिविष्टः सनातनः ॥ २३ ॥**

---

22 ab. क. हृदयानन्दवसु
ख. ग. ङ. हृदयानन्दी
22 b. ख. बलि:
ङ. वसुदेवसुतो बली
22 d ग. जरासन्धवधोत्सुकः
23 a. क. ग. ङ. जवाम्भो
ङ. विरुहो
... विरुदो [illegible] वरदो बली

**नागः** — आदिशेषः शयनतया अस्यास्तीति नागः। नागशब्दादर्श आद्यच्। नागशयन इत्यर्थः। **नवाम्भः** — नूतनजलधरकान्तिः। **विरुदः**— विगतरोदनः विशोक इत्यर्थः। **वीरहा** — परमात्मनो नास्तित्वं वदतो वीरान् हतवान्।

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।' (गी. 16–8)
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥' (गी. 16–19)

इति गीतावचनमत्र स्मर्तव्यम्। धर्मरक्षणार्थं तत्परिपन्थिनः वीरान् पराक्रमशालिनः असुरान् हन्तीति वा वीरहा। **वरदः** — आश्रितानाममीष्टप्रदः। **बली** — बलवान्। **गोपथः** — गोमार्ग एव मार्गो यस्य सः। गवानुचर इत्यर्थः। गावः ज्ञानानि पन्थाः प्राप्तिमार्गो यस्येति वा गोपथः। **विजयी** — सर्वत्र विजयः अस्यास्तीति। यद्वा विजयी ज्ञानशक्त्यादिगुणैः सर्वोत्कृष्टः। **विद्वान्** — सर्वज्ञः। **शिपिविष्टः** — शिपयो रश्मयः तान् संप्रविष्टः व्याप्तवान् दीप्तिपूर्ण इत्यर्थः।

'तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो'
(गी. 11–30)

इति भगवद्गीतायाम्। शिपयः पशवः तेषु विशति तिष्ठति यज्ञरूपेणेति शिपिविष्टः यज्ञमूर्तिः। 'यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति' (तै. सं. १–७–४) इति श्रुतेरिति चाहुः। **सनातनः** — नित्यः॥ २३॥

**परशुरामवचोग्राही वरग्राही शृगालहा।**
**दमघोषोपदेष्टा च रथग्राही सुदर्शनः॥ २४॥**

**परशुरामवचोग्राही** — परशुरामस्य यत् वचः मया रक्ष्यमाणे वैष्णवे धनुषि शरं योजयस्वेति तत् गृह्णाति स्वीकरोतीति तादृशः। **वरग्राही**—आश्रि-

---

24 a. ख. पर्शुराम

तान् स्वस्मात् वरं ग्राहयतीति तादृशः । भक्ताभीष्टप्रद इत्यर्थः । **शृगालहा**—शृगालनामकस्यासुरस्य हन्ता । शृगालं मिथ्यावासुदेवं हतवानिति शृगालहा इति वा । **दमघोषोपदेष्टा**— दमघोषः शिशुपालस्य पिता, तस्योपदेष्टा । दमस्य इन्द्रियनिग्रहस्य यो घोषः श्रुतिरूपः तस्योपदेष्टा इति वा । **रथग्राही**—रामावतारे इन्द्रेण मातलिद्वारा प्रेषितं रथं गृह्णातीति तादृशः ।

'सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते ।
दत्तस्तव महासत्त्व श्रीमन् शत्रुनिबर्हण ॥
इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम् ।
इत्युक्तस्संपरिक्रम्य रथं समभिवाद्य च ॥
आरुरोह तदा रामो लोकान् लक्ष्म्या विराजयन् ॥
(रा. ६–१०३–१९)

अर्जुनरथं सारथिः सन् गृह्णातीति वा । **सुदर्शनः**—शोभनं दर्शनं यस्य सः । 'सोमवत्प्रियदर्शनः' (रा. १–१८) इति रामायणे । शोभनमित्यस्य आनन्दजनकमित्यर्थः, यस्य दर्शनमात्रेणानन्दो जायते स सुदर्शनः । अथ वा दर्शनशब्दः नेत्रपरः । शुभे पद्मपत्रवदायते नेत्रे यस्य स सुदर्शनः । सुखेन दृश्यते भक्तैरिति वा सुदर्शनः ॥ २४ ॥

**वीरपत्नीयशस्त्राता जराव्याधिविघातकः ।**
**द्वारकावासतत्त्वज्ञः हुताशनवरप्रदः ॥ २५ ॥**

**वीरपत्नीयशस्त्राता**— वीरपत्न्याः द्रौपद्याः यत् यशः तस्य रक्षकः । विप्रपत्नीयशस्त्रातेत्यपि पाठान्तरम् । **जराव्याधिविघातकः**— जरायाः व्याधेश्च विनाशकः । ज्वरव्याधिविनाशक इति पाठान्तरम् ।

'आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति ॥
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥'

इत्यादिकमिह भाव्यम् । **द्वारकावासतत्त्वज्ञः** द्वारकायां वासस्य तत्त्वं याथात्म्यं जानातीति तादृशः । द्वारकानिलय इत्यर्थः । **हुताशनवरप्रदः**—हुताशनस्याग्नेः वरं प्रददातीति तादृशः । अग्नेर्दाहशक्तिं प्रददातीत्यर्थः ॥ २५ ॥

**यमुनावेगसंहारी नीलाम्बरधरः प्रभुः ।**
**विभुः शरासनो धन्वी गणेशो गणनायकः ॥ २६ ॥**

**यमुनावेगसंहारी**—यमुनानद्याः वेगं संहरतीति तादृशः । वसुदेवो यदा कृष्णं शिरसि गृहीत्वा ययौ तदा यमुना वेगमुपसंहृत्य जानुमात्रपरिमिता प्रवहति स्मेति प्रसिद्धम् । नीलाम्बरं धरतीति **नीलाम्बरधरः** । **प्रभुः**—समर्थः । मनुष्यसधर्मतया अवतरन्नपि भोगापवर्गप्रदानसमर्थ इत्यर्थः । **विभुः** सर्वगतः देशपरिच्छेदरहितः । **शरासनः**—शराः शत्रून् प्रति अस्यन्ते क्षिप्यन्तेऽनेनेति शरासनः । **धन्वी**—शार्ङ्गाख्यं धनुरस्यास्तीति धन्वी । **गणेशः**—गणानां परिवाराणामनन्तगरुडादीनामीशः नियन्ता । **गणनायकः** विघ्नसमूहनिवर्तकः । गोपीगणानां नियन्ता गोपीगणानां नेतेति वा अर्थः ॥ २६ ॥

**लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः ।**
**वामनो वामनीभूतोऽवामनो वामनारुहः ॥ २७ ॥**

**लक्ष्मणः**—लक्ष्मीसम्पन्नः, लक्ष्मणस्वरूपो वा । **लक्षणः**—सर्वं लक्षयति पश्यतीति । करचरणादिषु शुभचिह्नमस्यास्तीति वा । **लक्ष्यः**—योगिदृश्यः । जीवरूपस्य शरस्य वेधस्थानभूत इति वा । 'प्रणवो धनुः शरो

26 a. ग. वेगसंधारी
27 a ग. ङ. लक्ष्मणो लक्ष्मणो लक्षो
27 b क. विनाशकः
27 d क. नामनारूढः
ख. वमनो वमनारूढः
घ. बलिजिद्विक्रमत्रयः for वामनो वामनारुहः
ग. पुस्तके एतावच्छ्लोकपर्यन्तमेवोपलभ्यते ।

आत्मा ब्रह्म तल्लक्ष्यमुच्यते' (मु. 2-2-4) इति श्रुतेः। **रक्षोवंशविनाशनः** राक्षसवंशस्य विनाशकः। **वामनः**— वामानि सुखानि नयतीति वामनः। द्रष्टॄणां स्वकान्त्या सुखप्रद इत्यर्थः। वामनरूपी बलिं याचितवानिति वा। सम्भजनीय इति वा। 'मध्ये वामनमासीनं विश्वेदेवा उपासते' (क. उ. 2-5-3)। 'वन' सम्भक्तौ इति धातोः कर्मणि ल्युट्। **वामनीभूतः**— वामनीः इति छान्दोग्ये। **अवामनः**— स्वतो बृहत्कायः। **वामनारुहः**— वामनो नाम गजविशेषः तमारोहतीति वामनारुहः। 'गजेन महता यान्तम्' (रा. 2-2-22) इति रामायणे॥ २७॥

**यशोदानन्दनः कर्ता यमलार्जुनमुक्तिदः।**
**उलूखली महामानी दामबद्धाह्वयी शमी॥ २८॥**

**यशोदानन्दनः**— यशोदाया आनन्दजनकः पुत्रः। **कर्ता**— जगत्स्रष्टा। असुरादीनां छेत्तेति वा। 'कृञ् करणे' 'कृती छेदने'। स्वतन्त्र इति वा। 'स्वतन्त्रः कर्ता' (पा.सू. 1-4-54) इति पाणिनिस्मृतेः। **यमलार्जुनमुक्तिदः**— युग्मयोरर्जुनवृक्षयोः मोक्षप्रदः। नवनीतचौर्येण क्रुद्धया यशोदया उलूखले रज्ज्वा बद्धः श्रीकृष्णः यशोदायां गृहकृत्येषु व्यग्रायां सत्यां नारदशापेन वृक्षतां प्राप्तयोः नलकूबरमणिग्रीवयोः मोक्षं दित्सुः उलूखलं निर्यमातमाकृष्य वृक्षयोर्मध्यभागादगच्छत्। उलूखलेन आकृष्टौ तौ वृक्षौ पेततुः। ततस्तौ मुक्ताविति कथात्र स्मर्तव्या। **उलूखली**— उलूखले बद्धः। **महामानी**— मुक्ताभ्यां नलकूबरमणिग्रीवाभ्यां कृतः महान् मानः स्तोत्रादिकृतः सत्कारोऽस्यास्तीति तादृशः। अत एव **दामबद्धाह्वयी**— दामबद्ध इति आह्वयः नामास्यास्तीति। दामोदर इति हि प्रसिद्धिः कृष्णस्य। **शमी**- निगृहीतेन्द्रियः॥ २८॥

**भक्तानुकारी भगवान् केशवो बलधारकः।**
**केशिहा मधुहा मोही वृषासुरविघातकः॥ २९॥**

28 c. क. महामानो
29 b. ख. घ. केशवोऽचलधारकः

**भक्तानुकारी** — भक्तानुसारी भक्तानामाज्ञापरिपालकः। 'सेनयो-रुभयोर्मध्ये रथं स्थापय मेऽच्युत' (गी.1–21) इत्यर्जुनेनोक्तो भगवान् तथैव चक्र इत्यादिकमत्र भाव्यम्। **भगवान्** — ज्ञानशक्तिबलैश्वर्यवीर्यतेजोरूप-षड्गुणपरिपूर्णः। **केशवः** — कः ब्रह्मा ईशः रुद्रः एतौ द्वौ अङ्गभूतौ अस्य स्त इति केशवः।

'क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्।
आवां तवाङ्गे सम्भूतौ तस्मात् केशवनामवान्॥'

इति पौराणिकं निर्वचनम्। केशः प्रशस्तस्निग्धनीलकुटिलकुन्तलः अस्यास्तीति वा केशवः। 'केशाद्वोऽन्यतरस्याम्' (पा.सू. 5–2–109) इति सूत्रेण केश-शब्दात् प्रशंसायां मत्वर्थीयो वप्रत्ययः। केशिनामकासुरहन्तृत्वाद्वा केशवः।

'यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन।
तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसि॥'
(वि. पु. ५–१६–२३)

इति पौराणिकं निर्वचनम्। **बलधारकः** — बलं पौरुषं धारयतीति धारण सामर्थ्यवान्। 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः' (गी. 15–17)। अचलधारक इति पाठे अचलस्य गोवर्धनपर्वतस्य धारयितेत्यर्थः। **केशिहा** — केशिनामकमश्वरूपिणमसुरं हतवान्। **मधुहा** — वेदापहारिणं मधुनामानमसुरं हतवानिति मधुहा। **मोही** — मोहः भक्तेषु प्रीतिरस्यास्तीति। **वृषासुर-विघातकः** — वृषरूपिणः असुरस्य हन्ता॥ २९॥

**अघासुरविनाशी च पूतनामोक्षदायकः।**
**कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी॥ ३०॥**

**अघासुरविनाशी** — अघनामकस्यासुरस्य हन्ता। भागवते दशम-स्कन्धे द्वादशोऽध्याये अघासुरवृत्तान्तः द्रष्टव्यः। **पूतनामोक्षदायकः** —

---

30 a क. ङ. अघासुरविघाती
30 d क. ख. ङ. कंसमृत्युर्महामखी

पूतनानाम्नी असुरकन्या कंसेन प्रेरिता यशोदारूपिणी सविषं स्तन्यं ददौ । श्रीकृष्णश्च स्तन्यपानव्याजेन तां हतवान् । ततस्सा मोक्षमापेति भागवते । **कुब्जाविनोदी**—कंसदास्याः त्रिवक्रनाम्न्याः कुब्जायाः ऋजुतामापाद्य प्रमदोत्तमात्वं सम्पाद्य विनोदं कृतवानिति भागवतकथा । **कंसमृत्युमहामखी**—कंसस्य मृत्युः मरणं हननमेव महामखः महायज्ञः अस्येति । कंसमृत्युर्महामखीति पाठे नामद्वयम् । कंसमृत्युः कंसविनाशकः । महामखी महान्तो यज्ञा आराधनभूताः सन्ति अस्येति तादृशः । महायज्ञसमाराध्य इत्यर्थः ॥ ३० ॥

अश्वमेधो वाजपेयो गोमेधो नरमेधवान् ।
कन्दर्पकोटिलावण्यश्चन्द्रकोटिसुशीतलः ॥ ३१ ॥

**अश्वमेधः**—तद्रूपः, **वाजपेयः** तद्रूपः, **गोमेधस्तद्रूपः**, **नरमेधवान्** नरमेधरूपः । अश्वमेधादियज्ञसमाराध्यः । 'यज्ञो वै विष्णुः' इति श्रुतिः । **कन्दर्पकोटिलावण्यः**—मन्मथकोटीनां यत् लावण्यं सौन्दर्यं तत्तुल्यं तदस्यास्तीति । त्रैलोक्यविस्मयकरसुन्दररूप इत्यर्थः । **चन्द्रकोटिसुशीतलः** कोटिसङ्ख्याकचन्द्रवत् अत्यन्तशीतलः । भक्तानामत्यन्ताभिगम्य इत्यर्थः 'चन्द्रकान्ताननं रामतीव प्रियदर्शनम्' (रा.2-3-29) इति रामायणे ॥ ३१ ॥

रविकोटिप्रतीकाशो वायुकोटिमहाबलः ।
ब्रह्मा ब्रह्माण्डकर्ता च कमलावाञ्छितप्रदः ॥ ३२ ॥

**रविकोटिप्रतीकाशः**—सूर्यकोटिसदृशः । अभक्तानां शत्रूणां सूर्यकोटिवत् सन्तापकः । 'तं तपन्तमिवादित्यम्' इति रामायणे । **वायुकोटिमहाबलः**—कोटिसङ्ख्याकवायूनां यादृशं महाबलं स्यात् तादृशमहाबलयुक्तः । **ब्रह्मा ब्रह्माण्डकर्ता**—हिरण्यगर्भरूपः सन् ब्रह्माण्डस्य स्रष्टा । **कमलावाञ्छितप्रदः**—कमलायाः लक्ष्म्याः अभीष्टदाता ॥ ३२ ॥

कमली कमलाक्षश्च कमलामुखलोलुपः ।
कमलाव्रतधारी च कमलाभः पुरन्दरः ॥ ३३ ॥

**कमलाकमलाक्षः** कमले पद्मे इव अक्षिणी यस्य सः कमलाक्षः कमलासहितः कमलाक्षः कमलाकमलाक्षः । 'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' (छा. 1–6–6) इति श्रुतिः । **कमलीकमलाक्ष** इति पाठे तु कमली - कमला लक्ष्मीरस्यास्तीति कमली लक्ष्मीपतिः। **कमलाक्षः** – पद्मतुल्यनेत्रः । **कमलामुखलोलुपः** – कमलायाः लक्ष्म्याः मुखे लोलुपः अत्यन्तेच्छावान् । **कमलाव्रतधारी** — कमलायाः यत् व्रतं पत्यौ नारायणे एव प्रीतिरूपं तत् धारयतीति तादृशः । यथा लक्ष्म्याः पत्यावेव प्रीतिः नान्यत्र, एवं विष्णोरपि कमलायामेव प्रीतिः नान्यस्यामित्यर्थः । **कमलाभः** — कमलवद्भातीति । पद्मतुल्यकान्तिरित्यर्थः । **पुरन्दरः** — असुरपुराणि दारयतीति तादृशः । 'वाचंयमपुरन्दरौ च' (पा. सू 6–3–69) इति पाणिनिः ॥ ३३ ॥

सौभाग्याधिकचित्तोऽयं महामायी महोत्कटः ।
तारकारिः सुरत्राता मारीचक्षोभकारकः ॥ ३४ ॥

**सौभाग्याधिकचित्तः** — अधिकसौभाग्ययुक्तं चित्तं यस्य सः भक्तेष्वनुग्रहशीलं मनो यस्येत्यर्थः । चित्तस्य सौभाग्यमत्रानुग्रहशीलत्वम् । **महामायी** — आत्मजनमोहिनी तिरस्करिणीवत् आत्मस्वरूपाच्छादिका माया अस्येति महामायी । 'नाभिजानाति गुणमायासमावृतः' (गी. 7–25) इति गीतायाम् । **महोत्कटः** — भयङ्करः शत्रूणाम् । **मदोत्कट** इति पाठे मदेन उत्कटः । **तारकारिः** — तारकासुरस्य शत्रुः निहन्ता । **ताटकारिरिति** पाठे ताटकायाः संहर्ता । सुरत्राता सुराणां देवानामसुरराक्षसादिभ्यः रक्षकः ।

33 a क. घ. ङ. कमली कमलाक्षश्च
33 b ङ. मुखलोचनः
33 d ङ. कमलाक्षः
34 b क. मदोत्कटः
34 c क. ङ. ताटकारिः

**मारीचक्षोभकारकः** — रावणसचिवस्य मारीचनामकस्य राक्षसस्य कम्पजनकः ॥ ३४ ॥

**विश्वामित्रप्रियो दान्तो रामो राजीवलोचनः ।**
**लङ्काधिपकुलध्वंसी विभीषणवरप्रदः ॥ ३५ ॥**

**विश्वामित्रप्रियः** राजर्षेर्विश्वामित्रस्य तदाज्ञया ताटकादिसंहारेण प्रीतिपात्रभूतः । **दान्तः** — विश्वामित्रेण शिक्षितः, जितेन्द्रियः, तपःक्लेशसहिष्णुरिति वा । **रामः** — गुणैस्सर्वान् रमयतीति तादृशः दशरथपुत्रः । **राजीवलोचनः** — पुण्डरीकदलामलायतेक्षणः । '**रामः कमलपत्राक्षः**' (रा. 5-35-8) इति रामायणे । **लङ्काधिपकुलध्वंसी** — लङ्काधिपस्य रावणस्य कुलं वंशः तस्य नाशकः । **विभीषणवरप्रदः** — रावणानुजस्य विभीषणनामकस्य राक्षसस्य शरणं गतस्याभीष्टदः ॥ ३५ ॥

**सीतानन्दकरो रामो वीरो वारिधिबन्धनः ।**
**खरदूषणसंहारी साकेतपुरवासवान् ॥ ३६ ॥**

सीतायाः जानक्याः आनन्दजनकः । '**यस्त्वया स स्वर्गो निरयो यस्त्वया विना**' (रा. 2-30-18) इत्युक्तं हि सीतया रामं प्रति । **रामः** दशरथपुत्रः सर्वप्रियकरः । रमणीया गुणा अस्येति वा । **वीरः** विविधमीरयति प्राणिनश्चेष्टयतीति तादृशः । शत्रुक्षेपणशील इति वा । '**अज गतिक्षेपणयोः**' इति धातोः '**स्फायितञ्चिवञ्चि**' (उ. सू. 2-13) इत्यादिनौणादिसूत्रेण रक् । '**अजेर्व्यघञपोः**' (पा. सू. 2-4-56) इति वीभावः । शत्रुव्यथाकर इत्यर्थः ।

'**ब्रह्मदण्डप्रकाशानां विद्युत्सदृशवर्चसाम् ।**
**स्मरन् राघवबाणानां विव्यथे राक्षसेश्वरः ॥**' (रा.6-60-3)

---

36 d ख. ग. पुरवासनः

इति रामायणे । **वारिधिबन्धनः**—समुद्रसेतुकर्ता । **खरदूषणसंहारी**—खर-दूषणनामकयोः राक्षसयोः संहर्ता । **साकेतपुरवासवान्**—साकेतपुरेऽयोध्यानगर्यां वासोऽस्यास्तीति ॥ ३६ ॥

**चन्द्रावलीपतिः कूलः केशिकंसवधोऽमलः ।**
**माधवो मधुहा माध्वी माध्वीको माधवो विभुः ॥ ३७ ॥**

**चन्द्रावलीपतिः**—चन्द्रावलीनामिकायाः गोपिकायाः भर्ता, पालको वा । **कूलः** कूलसदृशः संसारार्णवपारभूतः । कूलं यमुनातटं क्रीडास्थानत्वेनास्यास्तीति वा । **केशिकंसवधः**—केशिनामकस्याश्वरूपिणोऽसुरस्य कंसस्य च विनाशकः । **अमलः**—हेयसम्बन्धलेशरहितः । **माधवः**—मायाः श्रियः धवः पतिः । 'अस्येशाना जगतो विष्णुपत्नी' (तै. सं. ४–२९) इति श्रुतिः । मधुविद्याबोध्य इति वा । 'असौ वा आदित्यो देवमधु' (छा. ३–१–१) इत्यादिना प्रस्तुता मधुविद्या छान्दोग्ये । **मधुहा**—मधुनामानमसुरं हतवान् । **माध्वी**—मधुवत् परमभोग्यभूतः । माध्वी—मधुरता अस्यास्तीति माध्वी । '**व्रीह्यादिभ्यश्च**' (पा.सू. ५–२–116) इतीकारान्तादपीनिः । **माध्वीकः**—समानोऽर्थः । मधुपुष्पजातं मद्यं माध्वीकं तत्स्वेयमस्यास्तीति वा । **माधवः**—मौनेन ध्यानेन योगेन सम्पन्नः । 'मौनात् ध्यानाच्च योगाच्च विद्धि भारत माधवम्' (महा. उद्योग. 70–4) :—**विभुः** देशपरिच्छेदरहितः ॥ ३७ ॥

**मुञ्जाटवीगाहमानः धेनुकारिर्धरात्मजः ।**
**वंशीवटविहारी च गोवर्धनवनाश्रयः ॥ ३८ ॥**

मुञ्जाप्रचुरमरण्यं गोचारणार्थं प्रविशन् **मुञ्जाटवीगाहमानः** । मुञ्जाटवीविहारवृत्तान्तः भागवते दशमस्कन्धे एकोनविंशेऽध्याये । **धेनुकारिः**—धेनुकनाम्नोऽसुरस्य संहर्ता । भागवते दशमस्कन्धे पञ्चदशेऽध्याये धेनुकासुर-

37 d ख. घ. माधवो मधुः
38 a क. मुञ्जाटवीगाहमानो

संहारवृत्तान्तो द्रष्टव्यः । **धरात्मजः**— पृथिवीसुतः, भूलोकेऽवतीर्ण इति वा अङ्गारकस्वरूप इति धरायाः यशोदायाः आत्मजः इति वार्थः । **वंशीवटविहारी**— वंशीवटवृक्षप्रचुरे प्रदेशे विहरणशीलः । **गोवर्धनवनाश्रयः**— गोवर्धनगिरिप्रान्तस्थवनमेवाश्रयो यस्य सः । गोपालवेषस्य भगवतः सौशील्यादिस्वभावप्रत्यापकान्येतानि नामानि ॥ ३८ ॥

तथा तालवनोद्देशी भाण्डीरवनशङ्खहा ।
तृणावर्तकृपाकारी वृषभानुसुतापतिः ॥ ३९ ॥

**तालवनोद्देशी**— तालवृक्षप्रचुरवनविहारी । तालफलानि गोपबालान् भोजयितुं तालवनस्योद्देशः सङ्केतोऽस्यास्तीति वा । **भाण्डीरवनशङ्खहा** — भाण्डीराख्ये वने विहरतः शङ्खचूडाख्यस्यासुरस्य हन्ता ! भण्डीरो वटवृक्षः तत्प्रचुरं वनं वृन्दावनस्थं भाण्डीरवनम् । **भाण्डीरवनशङ्कुहा** इति पाठे भाण्डीरवने शङ्कते बिभेति जनो यस्मात स भाण्डीरवनशङ्कः कालियाख्यः सर्पः तं हन्ति इति ततो निस्सारयतीति भाण्डीरवनशङ्कहा । **तृणावर्तकृपाकारी**— तृणावर्तनामकस्य कंसप्रेरितस्यासुरस्य संहरणेन मोक्षप्रदानेन कृपां कृतवान् । भागवते दशमस्कन्धे सप्तमाध्याये । **वृषभानुसुतापतिः**— वृषभानोस्सुता राधा तस्याः पतिः । वृषभानुरिति राधापितुर्नाम ॥ ३९ ॥

राधाप्राणसमो राधावदनाब्जमधुव्रतः ।
गोपीरञ्जनदैवज्ञः लीलाकमलपूजितः ॥ ४० ॥

**राधाप्राणसमः** — राधायाः प्राणतुल्यः क्षणमपि कृष्णविरहं न राधा सहत इति भावः । **राधावदनाब्जमधुव्रतः** —राधायाः वदनं मुखमेवाब्जं पद्मं तत्र मधुव्रतः तत्स्थमध्वास्वादशीलो भ्रमर इत्यर्थः । **गोपीरञ्जन-**

---

39 b ङ. भाण्डीरवनशङ्कुहा

39 c ख. घ. तृणावर्तकथाकारी

40 b घ. ङ. वदनाब्जमधुकरः

40 d ङ. लीलाकमल

दैवज्ञः — गोपीनां प्रीणनविधिज्ञः। येन येन प्रकारेण गोपिनां प्रीणनं कर्तव्यं तं तं प्रकारं जानातीत्यर्थः। अथवा गोपीनां रञ्जने दैवज्ञः ज्यौतिषिकः त्रिकालोचिताशेषशृङ्गारदर्शी। लीलाकमलपूजितः — लीलया अनायासेन कमलैः पद्मैः पूजितः। 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति' (गी. 9–26) इत्युक्तरीत्या यागादिवदायासं विना पुष्पमात्रसमर्पणेनापि पूजार्ह इत्यर्थः। अथ वा लीलया लीलाप्रधानया राधया कमलैः पूजितः॥ ४० ॥

**क्रीडाकमलसन्दोहः गोपिकाप्रीतिरञ्जनः।**
**रञ्जको रञ्जनो रङ्गो रङ्गी रङ्गमहीरुहः॥ ४१ ॥**

क्रीडाकमलसन्दोहः — क्रीडार्थानां कमलानां सन्दोहः समूहो यस्य सः। गोपिकाप्रीतिरञ्जनः — गोपिकानां गोपस्त्रीणां या प्रीतिः सुखं तत्र रञ्जनम् रागो यस्य सः। गोपिकानां सुखकर इति यावत्। रञ्जकः — भक्तानां प्रीतिकरः। रञ्जनः — भक्तानुरागपात्रभूतः। रङ्गः — नृत्यस्थलभूतः। रज्यत्यस्मिन् भक्तजन इति वा। रञ्जेरधिकरणे घञ्। रङ्गी — नर्तकः। रङ्गमहीरुहः — नृत्यस्थलवृक्षः। रङ्गभूमिं नर्तनार्थं आरोहतीति वा। रङ्गमल्लानां मल्लरङ्गे रुहः प्रादुर्भावोऽस्यास्तीति वा॥ ४१ ॥

**कामः कामारिभक्तोऽयं पुराणपुरुषः कविः।**
**नारदो देवलो भीमो बालो बालमुखाम्बुजः॥ ४२ ॥**

कामः — शीलौदार्यदयादिभिरात्मगुणैः नितान्तं कमनीयः। कामारिभक्तः — मन्मथशत्रो रुद्रस्य भक्तः। कामारी रुद्रो भक्तो यस्येति वा। कामारीणां भक्त इति वा। पुराणपुरुषः — अनादिपुरुषः। कविः क्रान्तदर्शी अतीन्द्रियार्थसाक्षात्कारसमर्थः। सर्वद्रष्टा वा। 'नान्योऽतोऽस्ति द्रष्टा' (बृ. उ. [illegible]–23) इति श्रुतेः। नारदः — नारदमहर्षिस्वरूपी। नरस्य सम्बन्धि अज्ञानं नारं तत् द्यति खण्डयतीति वा नारदः अज्ञाननाशकः 'अहमज्ञानजं तमः। नाशयाम्यात्मभावस्थः' (गी. 10–11) इति भगवद्गीतायाम् नारं चराचरात्मकं विश्वं दयते पालयतीति वा नारदः। देवलः — देवल-

नामकर्षिस्वरूपी । देवान् लाति आदत्ते रक्ष्यत्वेन स्वीकरोतीति वा देवलः । भीमः शास्त्रमर्यादां ये नानुवर्तन्ते ते बिभ्यत्यस्मादिति भीमः । 'भीमादयोऽपादाने' (पा.सू. 3–4–74) इति पाणिनिः । अभीम इति वा च्छेदः सन्मार्गवर्तिनामभयङ्कर इत्यर्थः । बालः—बाल्यावस्थः श्रीकृष्णः । वटपत्रपुटशायी शिशुरूपो वा । बालवत् स्वमाहात्म्यानाविष्कारक इति वा । बाल्यावस्थमम्बुजमिव मुखं यस्य सः बालमुखाम्बुजः । बालस्येव मुखमम्बुजमिवाऽस्येति वा बालमुखाम्बुजः ॥ ४२ ॥

अम्बुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः ।
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥ ४३ ॥

अम्बुनि जले मत्स्यादिरूपेण जायतेऽवतरतीति अम्बुजः । ब्रह्मसाक्षी – ब्रह्मैव साक्षी । परब्रह्मस्वरूपः सन् सर्वं साक्षात् ईक्षते इति भावः । योगी जगद्रक्षणचिन्तावान् । दत्तवरः—भक्तेभ्यो दत्तो वरो येन सः । योगिदत्तवर इति पाठे योगिभ्यो दत्तो वरो येन स इत्यर्थः । मुनिः— मननशीलः, भक्तानां हितचिन्तकः । ऋषभः—'ऋषी गतौ' इति धातोः 'ऋषिवृषिभ्यां कित्' (उ.सू. 410) इति अभच्प्रत्ययः । भक्तानां आर्तिविनाशार्थं ते यत्र सन्ति तत्प्रदेशं प्रति स्वयं गच्छतीत्यर्थः । गजेन्द्रमोक्षादिवृत्तान्तेषु प्रसिद्धोऽयं भगवतो महिमा । पर्वतः – गिरिवदचञ्चलः । ग्रामः—गुणसमूहोऽस्यास्तीति । चतुर्विधभूतग्रामः अस्मिन् सर्वत्वेनेति वा ग्रामः । नदीपवनवल्लभः—नदीनां परिसरे सञ्चारी वायुः प्रियो यस्य सः । यद्वा नद्याः यमुनायाः उपवनं समीपवनं तस्य वल्लभः स्वामी, तत् वल्लभं प्रियं यस्येत्यर्थः । उपवनमित्यत्र उकारलोपः ॥ ४३ ॥

पद्मनाभः सुरज्येष्ठी ब्रह्मा रुद्रोऽहिभूषितः ।
गणानां त्राणकर्ता च गणेशो ग्रहिलो ग्रही ॥ ४४ ॥

43 b ख. योगिदत्त
44 a क. ख. घ. छ. सुरज्येष्ठो
44 c क. गदानां

**पद्मनाभः** — पद्मं नाभौ यस्य सः जगत्स्रष्टृचतुर्मुखजन्मस्थानं पद्मं नाभावस्येत्यर्थः। तेन सकलजगत्कारणत्वमुच्यते। 'अजस्य नाभावध्येकमर्पितम्' इति श्रुतिः। अजस्य परमात्मनः नाभौ जगन्मूलकन्दभूतं पद्ममाश्रितमित्यर्थः। **सुरज्येष्ठी** — देवज्येष्ठः। देवानामग्रगण्यः। **ब्रह्मा** — चतुर्मुखः तदन्तर्यामी। **रुद्रः** — आश्रितानां रुजं द्रावयतीति। **अहिभूषितः** — सर्पालङ्कृतः। अहिना कालियसर्पेण भूषितः अलङ्कृतः। तस्य दमनकाले तत्फणामण्डलमध्यवर्तित्वात्। यद्वा स्वपादचिह्नेनाहिः कालियः भूषितः अलङ्कृतो येन सः। आहिताग्न्यादित्वात् भूषितशब्दस्य परनिपातः। **गणानः** — स्वपरिवारभूतानां देवानां गोगोपगोप्यादिगणानां च। **त्राणकर्ता** रक्षकः। **गणेशः** गणानां तेषामेव वा परिवाररूपाणां कुमुदकुमुदाक्षादीनां वा ईश्वरः नियन्ता। **ग्रहिलः** — ग्रहणशीलः सर्वजगद्वशीकर्तेत्यर्थः। ग्रहाः सूर्यादयः नियम्यत्वेन सन्त्यस्येति वा ग्रहिलः। पिच्छादित्वान्मत्वर्थीय इलच्। **ग्रही** — भक्त्या दीयमानं पत्रपुष्पादिकं प्रीत्या गृह्णाति स्वीकरोतीति ग्रही ॥ ४४ ॥

गणाश्रयो गणाध्यक्षः क्रोडीकृतजगत्त्रयः।
यादवेन्द्रो द्वारकेन्द्रो मधुरावल्लभो धुरी ॥ ४५ ॥

**गणाश्रयः** — नित्यसूरिगणानां भक्तवर्गाणां च आश्रयभूतः। दुःखपीडितजनसमूहाश्रय इति वा। 'आर्तानां संश्रयश्चैव यशसश्चैकभूषणम्' (रा. 4-15-19) इति रामायणे। **गणाध्यक्षः** — देवगणानामधिपतिः। **क्रोडीकृतजगत्त्रयः** — क्रोडीकृतं स्ववशीकृतं जगत्त्रयं भूम्यन्तरिक्षस्वर्गात्मकं येन सः। **यादवेन्द्रः** — यदुकुलोत्पन्नेषु श्रेष्ठः। **द्वारकेन्द्रः** — द्वारकाधिपतिः। **मधुरावल्लभः** — मधुरानगराधिपतिः। यदुकुले द्वारकायां मधुरायां च श्रीकृष्णचेष्टितानि भागवतादिषु वर्णितान्यत्रानुसन्धेयानि। **धुरी** — भुवनभारं रक्षणभरं वा वहतीति धुरी ॥ ४५ ॥

45 b क. गणक्रोधी
 ङ. गणाक्रोधी

भ्रमरः कुन्तली कुन्तीसुतरक्षो महामखी ।
यमुनावरदाता च काश्यपस्य वरप्रदः ॥ ४६ ॥

**भ्रमरः** भागवतहृत्पद्ममधुपः भक्तहृदयनिवासीत्यर्थः । भ्रमन् नृत्यन् रौति गायतीति वा भ्रमरः । **कुन्तली**—प्रशस्तस्निग्धनीलकेशः **कुन्तीसुतरक्षः**—कुन्तीपुत्रस्यार्जुनस्य रक्षकः । **महामखी**—महान्तः मखाः अस्य सन्तीति, सर्वयज्ञसमाराध्य इत्यर्थः । यज्ञानां महत्त्वं च भगवत्प्रीणनबुद्ध्या अनुष्ठीयमानत्वम् । वैदिकतान्त्रिकादिरूपेण वैविध्यं वा । **यमुनावरदाता**—यमुनानद्या अभीष्टवरप्रदः । तत्कूले तस्यां च विहरणेन तस्याः सन्तोषप्रद इत्यर्थः । **काश्यपस्य वरप्रदः**—अदित्या सहितः काश्यपः वर्षसहस्रं तपस्तेपे तेन तुष्टो विष्णुः वरं वरयेत्युक्तवान् । त्वं मम पुत्रो भवेति काश्यपः प्रार्थयामास । ततो विष्णुर्वामनरूपेण अदित्यां समजायतेति रामायणे बालकाण्डे एकोनत्रिंशे सर्गे स्थिता कथात्रानुसन्धेया ॥ ४६ ॥

शङ्खचूडवधोद्दामो गोपीरक्षणतत्परः ।
पाञ्चजन्यकरो रामी त्रिरामी वनजो जयः ॥ ४७ ॥

**शङ्खचूडवधोद्दामः**—शङ्खचूडाख्यासुरवधे क्रूरः । शङ्खचूडवधो दामीति पाठे शङ्खचूडस्य वधो यस्मात् स शङ्खचूडवधः । उदरे बन्धनरज्जुरस्यास्तीति दामी । **गोपीरक्षणतत्परः**—गोपस्त्रीणां रक्षणे आसक्तिमान् । **पाञ्चजन्यकरः**—पाञ्चजन्याख्यः शङ्खो हस्ते यस्य सः । **रामी**—रमणशीलः । रामाः रमण्योऽस्य सन्तीति वा । रामो रमणं सर्वत्रान्तर्यामितयास्यास्तीति वा । **त्रिरामी**—परशुराम–दाशरथिराम–बलरामाख्यराम‌त्रयस्वरूपी । त्रिषु स्थानेषु गोकुलमथुराद्वारकाख्येषु अतिशयेन रामो रमणं क्रीडा अस्यास्तीति त्रिरामीति वा । **वनजः**—वने जले मत्स्यादिरूपेण जायमानः । **जयः**—आश्रितविधेयः आश्रितैर्जीयते विधेयीक्रियत इति जयः । यथा

46 b क. ख. घ. सुतरक्षी
47 a क. ङ. शङ्खचूडवधो दामी

'आज्ञाप्योऽहं तपस्विनाम्' (रा. 3-6-22) 'ततो नारायणो विष्णुर्नियुक्तः सुरसत्तमैः' (रा. 1-16-1) इति रामायणे। समस्तानि भूतानि जयतीति वा जयः ॥ ४७ ॥

**फाल्गुनः फाल्गुनसखो विराधवधकारकः।**
**रुक्मिणीप्राणनाथश्च सत्यभामाप्रियङ्करः ॥ ४८ ॥**

**फाल्गुनः**—अर्जुनरूपः 'पाण्डवानां धनञ्जय' (गी. 10-37) इति स्मृतेः। हिमालयशिखरे उत्तरफल्गुनीनक्षत्रे अर्जुनस्य जन्माभूत्। अतः फाल्गुन इत्यर्जुन उच्यते। नरनारायणरूपत्वेनार्जुनकृष्णौ पुराणप्रसिद्धौ। अतोऽत्र नरात्मकार्जुनस्वरूप इत्यर्थः। **फाल्गुनसखः**—अर्जुनस्य सखा श्रीकृष्णः। 'सखेति मत्वा प्रसभं यदुक्तम्' (गी. 11-41) इति गीतायामर्जुनः कृष्णं प्रत्याह। **विराधवधकारकः**—रामावतारे विराधाख्यस्य राक्षसस्य हन्ता। **रुक्मिणीप्राणनाथः**—रुक्मिणीदेव्याः प्राणसमो भर्ता। **सत्यभामाप्रियंकरः**—सत्यभामायाः पारिजातार्पणेन प्रियं करोतीति तादृशः ॥ ४८ ॥

**कल्पवृक्षो महावृक्षः दानवृक्षो महाफलः।**
**अङ्कुशो भूसुरो भावो भ्रामको भामको हरिः ॥ ४९॥**

**कल्पवृक्षः**—कल्पवृक्षवत् कामितफलप्रदः। **महावृक्षः** संसारतापतप्तानां निवासप्रदः महान् वृक्षः। यथा वृक्षच्छायामाश्रितस्य तापा अपयन्ति तथा परमात्माख्यवृक्षमाश्रितस्य संसारतापोऽपैतीत्यर्थः।

'निवासवृक्षस्साधूनामापन्नानां परा गतिः।
आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् ॥'
(रा. 4-15-19)

---

49 c ख. च. भूसुरो भामो
49 d ख. च. ङ. भामको भ्रामको हरिः

इति रामायणे तारा श्रीरामचन्द्रं स्तौति । **दानवृक्षः** — अपेक्षितदाता वृक्षः **महाफलः** महान्ति फलानि यस्मिन् स इति दानवृक्षस्य विशेषणम् । महान्ति फलानि यस्मात् भवन्ति स इति वा। **अङ्कुशः** — शत्रूणां विषये अङ्कुशतुल्यः । **भूसुरः** — ब्राह्मणस्वरूपः । **भावः** — सर्वभूतविशिष्टतया भवतीति भावः । 'भवतेश्चेति वक्तव्यम्' (वा.पा. सू. 3-1-143) इति णप्रत्ययः । 'बहु स्यां 'प्रजायेय' (तै. उ. आनन्द १0) इति श्रुत्युक्तप्रकारेण प्रपञ्चरूपेण भवतीति वा। 'अजायमानो बहुधा विजायत' इति बहुधा जायमानः अवतरन् वा । भावयति उत्पादयति सर्वमिति वा भावः । **भ्रामकः** — अभक्तानां तत्त्वविषये विपरीतज्ञानजनकः। 'सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः' (गी.3-32) इति गीतायाम् । **भामकः** 'भाम क्रोधे' इति धातोः कर्तरि ण्वुल् भगवद्भक्तेषु येऽपकुर्वन्ति तेषु क्रोधकर्ता। रावणेन कृतव्रणं हनुमन्तं दृष्ट्वा रामः रावणविषये क्रोधमाहारयामास इति रामायणे—

'ततो दृष्ट्वा हनूमन्तं रावणेन कृतव्रणम् ।
दृष्ट्वा प्लवगशार्दूलं क्रोधस्य वशमेयिवान् ॥'
(रा. 6-159-136)

**हरिः** — पापहर्ता । 'हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः' । इति पुराणे ॥ ४९ ॥

**सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः ।**
**प्रद्युम्नो बलकर्ता च प्रहर्ता दैत्यहा प्रभुः ॥ ५० ॥**

**सरलः** — उच्चनीचभावमनपेक्ष्य सर्वैः सह संश्लेषशीलः । **शाश्वतः** - नित्यः । **वीरः** — पूर्वमेव कृतव्याख्यानमेतत्पदम् । पराक्रमीत्यर्थः । **यदुवंशी** — यादवानां वंशे समुद्भूतः । **शिवात्मकः** — रुद्रस्वरूपी सर्वमङ्गलकरस्वभाव इति वा । **प्रद्युम्नः** — प्रकृष्टं द्युम्नं धनमस्येति प्रद्युम्नः प्रकृष्टैश्वर्यः। आत्मप्रद्योतनलक्षणमैश्वर्यमस्येति वा । **बलकर्ता** — बलस्य आत्मज्ञानसाधनस्य बलस्य प्रदाता। 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतिः । गोवर्धनोद्धरणादौ

बलं करोतीति वा। प्रहर्ता शत्रुहन्ता। 'अभियाता प्रहर्ता च सेनानयविशारदः' (रा. 2-1-29) इति रामायणे। दैत्यहा — असुरान् हतवान् प्रभुः — सर्वजगत्स्वामी सामर्थ्यातिशयवान् वा। प्रभवत्यस्मात्सर्वमिति वा प्रभुः। 'अहं सर्वस्य प्रभवः' (गी.10-8) इति स्मृतेः ॥ ५० ॥

महाधनी महावीरो वनमालाविभूषणः।
तुलसीदामशोभाढ्यो जालन्धरविनाशनः ॥ ५१ ॥

**महाधनी** — अर्थिभ्यो दातव्यं महत् धनमस्यास्तीति महाधनी। **महावीरः** — महापराक्रमशाली। **वनमालाविभूषणः** — वनमाला वैजयन्तीनाम्नी माला विभूषणमलङ्कारो यस्य सः। भूतसूक्ष्मरूपमालालङ्कृत इति वा।

'तुलसीकुन्दमन्दारकरवीरसरोरुहैः।
पञ्चभी रचिता माला वनमालेति कीर्तिता ॥'

इत्युक्तया वनमालया विभूषित इत्यर्थः।

'मणिना काञ्चनेनापि वज्रवैडूर्यमौक्तिकैः।
रचिता पञ्चभिर्माला वैजयन्तीति कीर्तिता ॥'

इति स्मृतेः वैजयन्ती अन्येति केचित्। **तुलसीदामशोभाढ्यः** — तुलसीमालाकृतया शोभया सम्पन्नः। **जालन्धरविनाशनः** — जालन्धरो नामासुरविशेषः तस्य संहारकः। अयं वृत्तान्तः पाद्मोत्तरखण्डे विस्तरेण वर्तते ॥ ५१ ॥

शूरः सूर्यो मृतण्डश्च भास्करो विश्वपूजितः।
रविस्तमोहा वह्निश्च बाडवो वडवानलः ॥ ५२ ॥

---

51 a क.ख.ङ. महाधनो
51 d ङ जलन्धर
52 a ख.घ. शरः सूर्यो
क. सूर्यो भ्रतण्डश्च
ख. सूर्यो मृकण्डश्च

**शूरः** — पराक्रमवान् । **सूर्यः** सरतीति सूर्यः । 'राजसूयसूर्य' (पा. सू. 3–1–114) इति सूत्रेण सृधातोः सूर्यशब्दो निपातितः सूर्यवत्प्रकाशात्मकः । **मृतण्डः** सूर्यस्वरूपः मार्तण्ड इति पाठः स्यात् । भृकण्डरित्यपि पाठः । **भास्करः** — सूर्यवत्प्रकाशमानः । भाः दीप्तिं करोति सूर्यादीनामिति वा भास्करः । 'तस्य भासा सर्वमिदं विभाति' (मु. 2–2–10) । **विश्वपूजितः** — सर्वैरपि पूजितः । **रविः** — सूर्यात्मकः रूयते मुक्तैः प्राप्यते रवते संहारकाले विश्वं हिनस्तीति वा रविः । 'रुङ् गतिरेषणयोः' इति धातोरौणादिकः इः । **तमोहा** — अज्ञानाख्यान्धकारविनाशकः । 'अहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता' (गी. 10–11) इति गीतायाम् । **वह्निः** विश्वं वहतीति वह्निः । 'वहिश्रिश्रुयुद्रुग्लाहात्वारिभ्यो नित्' (उ. सू. ........) इत्युणादिसूत्रम् । **बाडवः** — विप्ररूपः । **बडबानलः** — बडबाग्निस्वरूपः ॥ ५२ ॥

दैत्यदर्पविनाशी च गरुडो गरुडाग्रजः ।
गोपीनाथो महीनाथो बृन्दानाथोऽविरोधकः ॥ ५३ ॥

**दैत्यदर्पविनाशी** — असुरगर्वविनाशकः । **गरुडः** गरुडपक्षिस्वरूपः, 'वैनतेयश्च पक्षिणाम्' (गी. 10–30) इति स्मृतेः । **गरुडाग्रजः**— गरुडस्य ज्येष्ठभ्राता । विनताया ज्येष्ठपुत्रः सूर्यसारथिररुणः गरुडाग्रजः तत्स्वरूप इत्यर्थः । **गोपीनाथः** — गोपिकानां भर्ता । **महीनाथः** — भूदेवीनायकः । **बृन्दानाथः** — बृन्दायाः राजकन्यायाः बृन्दावनाधिष्ठातृदेवतायाः वा नाथः । बृन्दावनभर्ता वा । **अविरोधकः** — केनापि सह स्वतो विरोधं न करोतीति तादृशः । विरोधक इति वा च्छेदः । कुरून् पाण्डवांश्च विरोधयतीति विरोधकः ॥ ५३ ॥

---

53 c महानार्यो

53 d ख. बृन्दानाथोऽवरोधकः

**प्रपञ्ची पञ्चरूपश्च लतागुल्मश्च गोपतिः ।**
**गङ्गा च यमुनारूपो गोदा वेत्रवती तथा ॥ ५४ ॥**
**कावेरी नर्मदा तापी गण्डकी सरयूस्तथा ।**

**प्रपञ्ची** — प्रपञ्चशरीरकः । **पञ्चरूपः** — पञ्च रूपाणि पर - व्यूह - विभव - हार्द - अर्चात्मकाः दिव्यमङ्गलविग्रहाः यस्य सः । **लतागुल्मः** — लतागुल्मप्रचुरेषु प्रदेशेषु विहारी । **गोपतिः** — वाक्पतिः, भोगभूमेः श्रीवैकुण्ठस्य पतिर्वा । **गङ्गा** — गङ्गास्वरूपः । **यमुनारूपः** — यमुनास्वरूपः । **गोदावेत्रवती** — प्रभृतिनदीस्वरूपश्च । 'स्रोतसामस्मि जाह्नवी' (गी.10-31) इति गीता ॥ ५४ ॥

**राजसस्तामसस्सत्त्वी सर्वाङ्गी सर्वलोचनः ॥ ५५ ॥**

**राजसस्तामसस्सत्त्वी** — सत्त्वरजस्तमोगुणानां प्रवर्तकः । परमात्मप्रेरणयैव गुणत्रयं स्वकार्ये प्रवर्तते इति भावः । **सर्वाङ्गी** सर्वा अन्या देवताः अङ्गानि यस्य सः । '**अङ्गान्यन्या देवता**' (तै. उ. शि. 10) इति श्रुतेः । **सर्वलोचनः** — सर्वद्रष्टा । सर्वत्र लोचनं यस्येति विग्रहः ॥ ५५ ॥

**सुधामयोऽमृतमयो योगिनीवल्लभः शिवः ।**
**बुद्धो बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः ॥ ५६ ॥**

**सुधामयोऽमृतमयः** — अमृतस्वरूपः । **योगिनीवल्लभः** — महाप्रभावशालिन्याः लक्ष्म्याः पतिः । योगिनीनां कात्यायनीव्रतकृशानां गोपीनां वल्लभः प्रिय इति वा । **शिवः** — मङ्गलकरः । **बुद्धः** — अतिरोहितनित्यप्रकाशः । बुद्धावतारो वा । **बुद्धिमतां श्रेष्ठः** — बुद्धिमतामग्रगण्यः । बुद्धिमतां मध्ये श्रेष्ठः तेषामपि बुद्धिप्रकाशकः । 'तं ह देवमात्मबुद्धि-

54 b मुद्रितपुस्तके 'गोपित:' इति पाठः
54 a ख. ङ. नर्मदा तापी
54 b क. सरजूरजः
ङ. सरयूरजः
56 b क. योगीनां वल्लभः

प्रकाशम्' (श्वे. 6–18) इति श्रुतेः। **विष्णुः** सर्वव्यापकः। **जिष्णुः** जयशीलः। 'नाविजित्य निवर्तते' (रा. 2–2–37) इति रामः स्तूयते रामायणे। **शचीपतिः** इन्द्राणीपतिः इन्द्रः इन्द्ररूपः, इन्द्रान्तर्यामीति वा ॥ ५६ ॥

वंशी वंशधरो लोकः विलोको मोहनाशनः।
रवरावो रवो रावो बलो बालबलाहकः ॥ ५७ ॥

**वंशी**—सर्वं जन्तुजातं स्वसन्तानभूतं यस्य सः। वंशो वेणुरस्यास्तीति वा। **वंशधरः**—स्वसन्तानभूतं जगत् धारयतीति तादृशः। वंशीधर इति पाठे मुरलीधरः। **लोकः**। लोक्यत इति लोकः। 'लोकृ दर्शने' इति धातोः कर्मणि घञ्। योगिभिः साक्षात्क्रियमाणः। **विलोकः** विविधो लोको यस्य सः। सर्वलोकाधिपतिरित्यर्थः। **मोहनाशनः**— अज्ञाननाशकः। **रवरावः** शब्दप्रतिपाद्यः। रवेण शब्देन राव्यते ज्ञाप्यत इति व्युत्पत्तेः। श्रुत्येकवेद्य इत्यर्थः। **रवः**—शब्दस्वरूपः। **रावः**—रावयति शब्दापयति इति रावः चतुर्मुखादीनां वेदाध्यापक इत्यर्थः। बलमस्यास्तीति बलः। **बालबलाहकः**— बालमेघश्यामकः। यद्वा बालानां गोपशिशूनां बलाहकः मेघवदभीष्टवर्षी योगक्षेमविधायक इत्यर्थः। 'योगक्षेमं वहाम्यहम्' (गी. 9–22) इति स्मृतेः ॥ ५७ ॥

शिवो रुद्रो नलो नीलो लाङ्गली लाङ्गलाश्रयः।
पारदः पावनो हंसो हंसारूढो जगत्पतिः ॥ ५८ ॥

**शिवः**—मङ्गलकरः। **रुद्रः**—भक्तिद्रुतहृदयान् सानन्दबाष्पं रोदयतीति रुद्रः।

---

57 a ङ. वंशीधरो
57 ab क.ङ. लोकविलोको
57 d क.ङ. बलो बालो बलाहकः
ख.घ. बालो बाल
58 b ख. लाङ्गुली लाङ्गुलाश्रयः
ङ. लाङ्गुली लाङ्गुलाश्रयः

'आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान् ।
सदा परगुणाविष्टो द्रष्टव्यः सर्वदेहिभिः ॥'

इति विष्णुतत्त्वे भक्तस्यावस्था वर्णितात्रानुसन्धेया । **नलः**—नलचक्रवर्तिस्वरूपः । रलयोरभेदात् नर इति वा । पुरुष इत्यर्थः । न लीयते क्षीयत इति वा नलः । **नीलः**—नीलवर्णः । भगवतो नीलमेघश्यामलत्वात् । **लाङ्गली**—हलायुधो बलरामः । **लाङ्गलाश्रयः**— स एव । **पारदः** । संसारपारभूतं मोक्षं ददाति इति पारदः । मोक्षप्रद इत्यर्थः । 'मोक्षमिच्छेत् जनार्दनात्' इति स्मृतेः । **पावनः**—पावयतीति पावनः चालनः । 'भीषास्माद्वातः पवते' (तै. आ. 32) इति श्रुतेः । पवित्राणां पवित्रत्वापादक इति वा । **हंसः**—हंसरूपी, कृतहंसावतारः । **हंसारूढः** — हंसमारूढः । **जगत्पतिः** जगतां पतिः स्वामी ॥ ५८ ॥

**मोहिनीमोहनो मायी महामायो महामखी ।**
**वृषो वृषाकपिः कालः कालीदमनकारकः ॥ ५९ ॥**

**मोहिनीमोहनः**— मोहिन्यवतारेण असुराणां व्यामोहजनकः । **मायी** — माया विचित्रसृष्टीकरी प्रकृतिः अस्यास्तीति मायी । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे. 4–10) इति श्रुतिः । **महामायः** महती माया आश्चर्यजनकशक्तिः यस्य सः । **महामखी**— महान्तो मखाः यज्ञा आराध्यतया अस्य सन्तीति महामखी । **वृषः** — आश्रितानामभीष्टवर्षुकः । **वृषाकपिः** सर्वकामानां वर्षणात् वृषः धर्मः कात् तोयात् भूमिमपादिति कपिर्वराहः । धर्मरूपत्वात् वराहरूपत्वाच्च वृषाकपिः ।

'कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्मात् वृषाकपिं प्राह काश्यपो मां प्रजापतिः ॥'

59 a ङ मोहनोमोहनो
59 b ङ महामायी महामखः
'महामाया महामखः' इति मुद्रितपुस्तके ।

इति महाभारते (शान्ति. ३४२–८९) **कालः** आत्मनि चराचरं कलयति सङ्कलयति इति कालः । '**कालः कलयतामहम्**' (गी. 10–30) इति भगवद्गीतायाम् । **कालीदमनकारकः**—काल्याः दमनं करोतीति तादृशः । कालीनियन्तेत्यर्थः ॥ ५९ ॥

**कुब्जाभाग्यप्रदो वीरः रजकक्षयकारकः ।**
**कोमलो वारुणो राजा जलजो जलधारकः ॥ ६० ॥**

**कुब्जाभाग्यप्रदः**—कुब्जायाः वक्रगात्रायाः भाग्यं सुरूपं प्रददातीति तादृशः ।

'प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम् ।
ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम् ॥'

इत्यादि भागवते (१०–४२–६) । **वीरः** प्राणिनः विविधमीरयति चेष्टयतीति वीरः । पराक्रमीति वा । **रजकक्षयकारकः**—रजकस्य विनाशकः । अक्रूरेण प्रेरितः कृष्णः बलरामसहितः कंसगृहं प्रति प्रतिष्ठमानः मध्येमार्गं रजकं कंचिदायान्तं दृष्ट्वा तं वस्त्राण्ययाचत । स तु रजकः गोपवेषाणां भवतां राजार्हाणि वस्त्राणि न दास्यामीति सपरिहासमधिचिक्षेप । ततः कुपितः कृष्णः तं रजकमहन् इति भागवते दशमस्कन्धे एकचत्वारिंशत्तमेऽध्याये वर्तमाना कथात्रानुसन्धेया । **कोमलः**—मृदुस्वभावः स्वल्पस्यापि परदुःखस्यासहिष्णुः । 'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः' (रा 2–2–39) इति रामायणे । **वारुणः**—वरुणस्यापत्यं वसिष्ठोऽगस्त्यो वा वारुणः तत्स्वरूप इत्यर्थः । यद्वा 'वृञ् वरणे' 'कृवृदारिभ्य उनन्' (उ.सू. 340) परमात्मानं यः स्वामित्वेन वृणुते स वरुणः तत्र भवः वारुणः । '**मयि ते तेषु चाप्यहम्**' (गी. 9–29) इति गीतायाम् । **राजा**—दीप्तिमान् । **जलजः**—जले मत्स्यादिरूपेण जायमानः । **जलधारकः**—जलस्य धारयिता । 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः' (बृ.उ.5–8–9) इत्यादि ॥ ६० ॥

**हारकः सर्वपापघ्नः परमेष्ठी पितामहः ।**
**खड्गधारी कृपाकारी राधारमणसुन्दरः ॥ ६१ ॥**

भक्तानां पापानि हरतीति हारकः। सर्वपापघ्नः—सर्वाणि पापानि भक्तिवशीकृतो हन्तीति तादृशः। परमेष्ठी—परमे स्थाने तिष्ठतीति परमेष्ठी। 'परमे कित्' (उ. सू. 4९) इतीनिप्रत्ययः। 'अम्बाम्ब' (पा.सू. 8-3-97) इत्यादिना षत्वम्। 'हलदन्तात्' (पा.सू. 6-3-9) इति सप्तम्या अलुक्। पितामहः—चतुर्मुखस्वरूपः। पितामहत्वेन वर्तमानो वा। 'पिताहमस्य जगतो माता धाता पितामहः' (गी. 9-17) इति स्मृतेः। खड्गधारी—खड्गं नन्दकं धारयतीति। कृपां दीनेषु करोतीति कृपाकारी। राधारमणसुन्दरः—राधायाः प्रीतिकरणे सौन्दर्येण युक्तः। राधया सह रमणे सुन्दरः निपुण इति वा ॥६१॥

**द्वादशारण्यसम्भोगी शेषनागफणालयः।**
**कामः श्यामः सुखश्रीदः श्रीपतिः श्रीनिधिः कृती ॥६२॥**

द्वादशारण्यसम्भोगी—द्वादशसु अरण्येषु सम्भोगशीलः।
'भद्र-श्री-लोहभाण्डीर-महा-ताल-खदीरकाः।
बहुलं कुमुदं काम्यं मधुवृन्दावनं तथा॥
द्वादशैता वने सङ्ख्या॥'

इति पाद्मवचनं वाचस्पत्ये उदाहृतम्। कालिन्दीपरिसरस्थानीयान्यरण्यानि। शेषनागफणालयः—शेषाख्यो यो नागः सर्पः तस्य फणैव आलयः वासस्थानं यस्य सः। कामः—सर्वैः काम्यमानः। 'रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम्, (रा, 2-3-29) इति रामायणे। श्यामः—नीलमेघश्यामलवर्णः। सुखश्रीदः—सुखं च श्रीश्च ऐश्वर्यं च तयोः प्रदाता। श्रीपतिः—लक्ष्मीपतिः। श्रीनिधिः—श्रियाः वासस्थानम्। कृती—आश्रितत्राणे प्रयत्नशीलः ॥ ६२ ॥

62 c ख सुख: श्रीदः
62 d क: प्रिभाः प्रद पतिः कृती
ख. कृतिः for कृती
ङ. प्रीहः प्रीदः पतिः कृता

हरिर्नारायणो नारो नरोत्तम इषुप्रियः।
गोपाली चित्तहर्ता च कर्ता संसारतारकः ॥ ६३ ॥

यज्ञे दीयमानं हविः हरतीति हरिः। नारः नरेष्वन्तर्यामितया स्थितः। नरोत्तमः—पुरुषोत्तमः। इषुप्रियः—बाणप्रियः। गोपाली—गोपालवेषधारी। चित्तहर्ता—रूपौदार्यगुणैः सर्वेषां चित्तस्यापकर्षकः। अथवा गोपालीचित्तहर्तेत्येकं पदम्। गोपस्त्रीणां रूपौदार्यगुणैः चित्ताकर्षक इत्यर्थः। कर्ता—स्वतन्त्रः। संसारतारकः— संसारार्णवपारगमयिता। 'अमृतस्यैष सेतुः' (मु, 2-2-5) इति श्रुतिः ॥ ६३ ॥

आदिदेवो महादेवो गौरीगुरुरनाश्रयः।
साधुर्मधुर्विधुर्धाता त्राताक्रूरपरायणः ॥ ६४ ॥

आदिदेवः — सर्वेषामपि कारणभूतः अत एव द्योतमानः। महादेवः महांश्चासौ देवश्च। गौरीगुरुः — गौर्याः पार्वत्याः पतिः। परमशिवस्वरूप इति यावत्। अनाश्रयः — न विद्यते आश्रयो यस्य सः। अनन्याधारः स्वमहिमप्रतिष्ठः। साधुः — न्यायमार्गे प्रवृत्तः, अभीष्टं साधयतीति वा साधुः। मधुः — लब्धविधेभ्यः मधुवत् स्वदमानः। 'प्रियो हि ज्ञानिनोऽत्यर्थम्' (गी. 7-17) माधुरिति पाठे मां लक्ष्मीं दधातीति माधुः लक्ष्मीधर इत्यर्थः। विधुः — विध्यत्यसुरानिति विधुः। विदधाति सर्वं जगदिति वा। धाता — स्रष्टा धारयिता वा विश्वस्य। त्राता — रक्षकः। अक्रूरपरायणः अक्रूरे प्रीतिमान्। अक्रूरनामा ऋषिः कृष्णभक्तः भागवते प्रसिद्धः। अक्रूराणां सात्त्विकजनानां परमप्राप्यभूत इति वा ॥ ६४ ॥

रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः।
वनं वनी वनाध्यक्षः महावन्द्यो महामुनिः ॥ ६५ ॥

---

63 a ख.घ. हरिर्हरो नरो नारो
63 c क.घ. गोपालचित्त-
64 d ख.घ. धाताक्रूर

Q22:4146
15M85



**रोलम्बी**—रोलम्बो भ्रमरः तद्वान्। भक्तरूपैर्भ्रमरैः परिवृतः, मधुरूपत्वात्। **हयग्रीवः**—हयस्य अश्वस्येव ग्रीवा मुखं यस्य सः। स्वीकृतहयग्रीवावतारः। ब्रह्मणः सकाशात् मधुकैटभाभ्यां वेदेष्वपहृतेषु तौ निहत्य विष्णुः विस्मृतवेदाय ब्रह्मणे हयग्रीवरूपस्सन् वेदानुपदिदेशेति पुराणप्रसिद्धम्। **वानरारिः**—वालिशत्रुः। द्विविदनाम्नः वानरस्य बलभद्ररूपेण अरिरिति वा। **वनाश्रयः**—अरण्यनिवासी। **वनं**—अरण्यस्वरूपी, नैमिशारण्ये अरण्यरूपेण भगवानस्तीत्याहुः। वृन्दावनवासी, वृन्दावनस्वरूप इति वा। **वनी**—विहाराय वनमस्यास्तीति वनी वनस्थ इत्यर्थः। **वनाध्यक्षः**—वनस्याधिपतिः। **महावन्द्यः**—महांश्चासौ वन्द्यश्च नमस्कार्यश्च। महद्भिर्वन्द्यो वा। महाबन्ध इति पाठे महान् बृन्दावनापरित्यागरूपः प्रतिज्ञाविशेषः अस्येति। **महामुनिः** महांश्चासौ मुनिश्च मननकर्ता च। जगद्रक्षणचिन्तनशील इति यावत्। व्यासादिरूपो वा।

'कृष्णद्वैपायनं व्यासं विद्धि नारायणात्मकम्' इति स्मरणात्॥ ६५॥

**स्यामन्तकमणिप्राज्ञो विज्ञो विघ्नविघातकः।**
**गोवर्धनो वर्धनीयः वर्धनो वर्धनप्रियः॥ ६६॥**

स्यमन्तकनाममणिं प्रकर्षेण जानातीति **स्यामन्तकमणिप्राज्ञः**। स्यमन्तकोपाख्यानं भागवते दशमस्कन्धे षट्पञ्चाशत्तमेऽध्याये। विशेषेण सर्वं जानातीति **विज्ञः**।

"अशुभानि निराचष्टे तनोति शुभसन्ततिम्।
स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं विदुः॥"

इति स्मरणात्। **विघ्नविघातकः**—स्मरणमात्रेण विघ्नानां नाशकः। **गोवर्धनः**—गाः वर्धयतीति तादृशः। गोवर्धनाख्यपर्वतस्वरूपो वा। **वर्धनीयः**—आराधकसमर्पितैर्हविर्भिः पोषणीयः। **वर्धनः**—भक्तिसम्पन्नाः प्रजाः वर्धयतीति वर्धनः। **वर्धनप्रियः**—प्रजानां वर्धनं प्रियं यस्य सः॥६६॥

65 d ङ महाबन्धो
66 a क.ख.ङ. स्यमन्तक
66 d ङ वर्धनी

SRI VENKATESWARA CENTRAL LIBRARY & RESEARCH CENTRE. TIRUPATI. 23213

वर्धन्यो वर्धनी वर्धी वर्धिष्णुः सुमुखप्रियः ।
वर्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः ॥ ६७ ॥

**वर्धन्यः** वृद्धिशीलः सदा अभिवर्धमानः । सर्वपूज्यत्वाद्वर्धनार्ह इत्यर्थः । **वर्धनी** — आश्रितजनान् वर्धयतीति तादृशः । **वर्धी** — वृद्धिमान् । **वर्धिष्णुः** — वर्धनशीलः । **सुमुखप्रियः** — सुशोभनं अविकृतं प्रसन्नं मनोहरं च मुखं यस्य सः सुमुखः सुमुखश्चासौ प्रियश्च । 'प्रसन्नवदनं चारु पद्मपत्राय-तेक्षणम्' इति विष्णुपुराणे (६-७-४०) **वर्धितः** गुणकीर्तनैः भक्तैःक्रियमाणैः वृद्धिं प्राप्तः । **वृद्धकः** — प्रवृद्धः सनातन इत्यर्थः 'त्वेषं ह्यस्य स्थविरस्य नाम' इति श्रुतिः । **वृद्धः** समानोऽर्थः । **वृन्दारकजनप्रियः** — वृन्दारकजनाः देवजनाः प्रियाः यस्य सः । वृन्दारकजनानां प्रिय इति वा ॥ ६७ ॥

गोपालरमणीभर्ता साम्बकुष्ठविनाशकः ।
रुक्मिणीहरणः प्रेमप्रेमी चन्द्रावलीपतिः ॥ ६८ ॥

**गोपालरमणीभर्ता** — गोपालरमणीनां गोपस्त्रीणां भर्ता पतिः धार-यिता । **साम्बकुष्ठविनाशकः** – साम्बनामा कश्चित् कुष्ठरोगार्तः भगवन्तं तुष्टाव । तेन प्रीतो भगवान् तदीयरोगं विनाशयामासेत्याहुः । **रुक्मणी-हरणः** — रुक्मिणीं हरति गान्धर्वेण विधिना हरतीति तादृशः । **प्रेम** — प्रीतिस्वरूपः । **प्रेमी** — अतिशयितप्रेमवान् । रुक्मिणीहरणप्रेमा प्रेमी इति पाठान्तरम् । तत्र रुक्मिण्याः हरणे प्रेमा प्रीतिर्यस्य सः रुक्मिणीहरणप्रेमा ।

---

67 a ख. वधन्यो वर्धनो
67 b ख. घ. वार्धिन्यः सुमखः
ङ सुमुखप्रियः
67 c क वर्धितो वर्धको
68 b क. ङ शाम्बकुष्ठविनाशनः
68 cd ङ हरणप्रेमा प्रेमी
68 d क. प्रेमा चन्द्रावली-

भक्तेषु प्रेम प्रीतिरस्यास्तीति प्रेमी । भक्तैः स्वस्मिन् क्रियमाणेन प्रेम्णा भक्तेषु प्रेम यस्येति वा । चन्द्रावलीपतिः — चन्द्रावलीनामिकाया गोपिकायाः पतिः । यद्वा मुखकपोलमस्तकनखरूपाणां चन्द्राणां आवल्याः पङ्क्तेः धारकः ॥ ६८ ॥

श्रीकर्ता विश्वभर्ता च नरो नारायणो बली ।
गणो गणपतिश्चैव दत्तात्रेयो महामुनिः ॥ ६९ ॥

श्रियं लक्ष्मीं अवतारकाले स्वानुरूपां करोतीति श्रीकर्ता । 'देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी' (वि.पु. 1-9-145) स्मरतां स्तुवतां अर्चयतां च भक्तानां श्रियं करोतीति वा । विश्वभर्ता — विश्वं बिभर्तीति । 'यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः' (गी.15-17) इति गीतायाम् । नरो नारायणः — नरनारायणस्वरूपी । बली — धारणसामर्थ्यवान् । गणः — देवगणवान् । गणपतिः — परिवारदेवगणस्याधिपतिः । दत्तात्रेयो महामुनिः — दत्तात्रेयसंज्ञको महान् मुनिः ।

'काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः ।
काषायधारिणा पूर्वं विष्णुना रक्षिता त्रयी ॥'

इति प्रमाणवचनमत्र स्मर्तव्यम् ॥ ६९ ॥

व्यासो नारायणो दिव्यो भव्यो भावुकधारकः ।
श्वःश्रेयसं शिवं भद्रं भावुकं भाविकं शुभम् ॥ ७० ॥

वेदाः पुराणानि च व्यस्ताः विभक्ताः अनेनेति व्यासः । व्यासस्वरूपी । व्यासो नारायण इति प्रसिद्धम् ।

---

69 b क.ख.घ.ङ. नारायणनरो बली
70 c क. श्वश्रेयसं
ङ. स्वः श्रेयसम्
70 d क. भावुकं भवुकं
ख. भावुकं भविकं

'कृष्णद्वैपायनं व्यासं विद्धि नारायणात्मकम् ।
को ह्यन्यो भुवि मैत्रेय महाभारतकृद्भवेत् ॥'

(वि.पु. 3-4-5)

नारायणः — कृतव्याख्यानमेतत्पदम् । दिव्यः दिवि भवः अप्राकृत-श्रीवैकुण्ठनिलयः । भव्यः मङ्गलस्वरूपः । भावुकधारकः — ईश्वरभावनां कुर्वन्ति ये भक्ताः ते भावुकाः तेषां धारकः धारणहेतुः जीवनप्रदः । विना क्षणमपि भगवन्तं न प्राणान् धारयन्ति हि भक्ताः । श्वःश्रेयसादयः शब्दाः मङ्गलपर्यायाः ॥ ७० ॥

**शुभात्मकः शुभः शास्ता प्रशास्ता मेघनादहा ।**
**ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ॥ ७१ ॥**

शुभात्मकः — मङ्गलस्वरूपः । शुभः आत्मा विग्रहो यस्येति वा । शुभः समानोऽर्थः । शास्ता — श्रुतिस्मृत्यादिभिः सर्वेषां शासनं करोतीति तादृशः आज्ञापयिता । प्रशास्ता — प्रकृष्टशासनकर्ता । शासनस्य प्रकर्षो नाम अप्रतिहतत्वं सर्वविषयकत्वं वा । शासनं नियमनम् । मेघनादहा — मेघनादापरनामकमिन्द्रजितं रावणपुत्रं लक्ष्मणरूपी हतवान् । ब्रह्मण्यदेवः — ब्रह्मण्यः वेदतपोब्राह्मणादीनां हितकरः स चासौ देवश्च । अथ वा ब्रह्मण्यः भगवद्भक्तजनः देवो यस्य सः । दीनानां — अकिञ्चनजनानाम् उद्धारकरणे क्षमः — शक्तः ।

'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्' (गी. 12-7) इति गीतायाम् ॥ ७१ ॥

**कृष्णः कमलपत्राक्षः कृष्णः कमललोचनः ।**
**कृष्णः कामी सदा कृष्णः समस्तप्रियकारकः ॥ ७२ ॥**

कृष्णः — कंसादिभारासहिष्णोः भूदेव्याः सुखकरः । 'कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः' इति स्मरणात् । कमलपत्राक्षः — पद्मपत्रे

71 b क. ङ. प्रशस्तो मेघनादहा

इवाक्षिणी यस्य सः । **कृष्णः** — नीलमेघश्यामलः । **कमललोचनः** — पुण्डरीकाक्षः । **कृष्णः** — वसुदेवसूनुः । **कामी** — भक्तेषु कामवान् । काम्यमानानि यमनलादिमहादिमान् वा । **समस्तप्रियकारकः** — सर्वेषां प्रियं करोतीति तादृशः । सर्वाणि प्रियाणि करोतीति वा ॥ ७२ ॥

**नन्दो नन्दी महानन्दी मादी मादनकः किली ।**
**मिली हिली गिली गोली गोलो गोलालयो गुली ॥ ७३ ॥**

**नन्दः** — भोग्यभोगोपकरणसमृद्धः । 'टु नदि समृद्धौ' इति धातुः। **नन्दी** नन्दः नन्दगोपः पिता अस्यास्तीति नन्दी । **महानन्दी** — महान् 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्' इति श्रुतिप्रसिद्धः निरतिशयः आनन्दः अस्यास्तीति महानन्दी । **मादी** — मादः हर्षः अस्यास्तीति मादी । मादयति विद्याधनादिना हर्षयति स्वभक्तानिति वा मादी । **मादनकः** — भक्तान् मादयति हर्षयतीति मादनः । स्वार्थे कप्रत्ययः । **किली** — किलः अनुनयः भक्तानुसरणमस्यास्तीति किली । 'किलशब्दस्तु वार्तायां सम्भाव्यानुनयार्थयोः' इति विश्वः । किलति विश्वसर्गादिना क्रीडतीति वा किली । ग्रहादित्वाण्णिनिः । संज्ञापूर्वकविधेरनित्यत्वात् गुणाभावः । **मिली** — स्वकीयमुत्कर्षमविगणय्य नीचैः सह संश्लेषस्वभाववान् । **हिली** — 'हिल भावकरणे' इति धातुः । आश्रितेषु समीचीनं भावं करोतीति तादृशः । **गिली** । गरणं गिलिः सोऽस्यास्तीति गिली प्रलयसमये सर्वजगद्गिरणवान् । गोपीदत्तनवनीतादिभक्षणशीलो वा भक्तदत्तपत्रपुष्पादिगरणशीलो वा । **गोली** — गोला मनश्शिला अलङ्करणमस्यास्तीति गोली । 'मनश्शिला गोलः' इत्यमरः । मनश्शिलायास्तिलकस्तं किल स्मर्तुमर्हसि' इति रामायणे । गाः लान्ति आददत इति गोलाः गोपाः क्रीडोपकरणत्वेनास्य सन्तीति वा गोली । **गोलः** — गाः लाति आदत्ते चारणार्थं स्वीकरोति गोलः । **गोलालयः** — गोलानां गोपालानामाश्रयः । **गुली** — उद्यमशीलः 'गुरी' उद्यमने इति धातुः । रलयोरभेदः गुलति गुडति रक्षति स्वभक्तानिति वा गुली । रक्षणार्थात् गुडेः ग्रहादित्वादिनिः । डलयोरभेदः ॥ ७३ ॥

---

73 a ङ महानादी
3 cd क. मीली वाली गिली गोली गोलो गोलालयोङ्गुलिः

गुग्गुली मारकी शाखी वटः पिप्पलकः कृती ।
म्लेच्छहा कालकर्ता च यशोदायश एव च ॥ ७४ ॥

गुग्गुली — गुग्गुलाख्यवृक्षविशेषस्वरूपी । गुग्गुलाख्यधूपोऽस्यास्ति प्रियत्वेनेति वा गुग्गुली । मारकी — मारं कामं कायतीति मारकः वेणुः सोऽस्यास्तीति । शाखी — वेदशाखाः प्रतिपादकत्वेन सन्त्यस्येति । वटः — वटवृक्षस्वरूपी । वटते स्वशक्त्या वेष्टयते सर्वानिति वा । पिप्पलकः — अश्वत्थवृक्षस्वरूपी । कृती — धर्मप्रवर्तनार्थं कृतमनेनेति । म्लेच्छहा — म्लेच्छान् हतवान् । कालकर्ता — कालस्य कर्ता अहोरात्रादिरूपेण कालस्य विभाजक इत्यर्थः । यशोदायशः — यशोदायाः मातुः कीर्तिप्रदः । कृष्णस्य माता यशोदा कीदृशं तपः तप्तवती इति हि जनाः कीर्तयन्ति ॥ ७४ ॥

अच्युतः केशवो विष्णुः हरिः सत्यो जनार्दनः ।
हंसो नारायणो लीलो नीलो भक्तिपरायणः ॥ ७५ ॥

अच्युतः — स्वरूपेण गुणैश्च न च्यवत इत्यच्युतः । 'शाश्वतं शिवमच्युतम्' (ना.उ. 13-1) इति श्रुतेः । विकाररहित इत्यर्थः । केशवः — प्रशस्तनीलकुन्तलः, केशिसंहर्ता ब्रह्मरुद्रयोरीश इति वा । विष्णुः — स्वानन्यम्यमूर्तं चिदचिदात्मकं सर्वं विशति व्याप्नोतीति विष्णुः ।

'व्याप्य मे रोदसी पार्थ कान्तिश्चाभ्यधिका स्थिता ।
क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ॥'

(भार. शा. ३४१-४२) हरिः — सहेतुकं संसारं हरति निवर्तयतीति हरिः । सत्यः — सत्सु साधुः, निर्विकारः । सत्यं यथार्थभाषणमस्यास्तीति वा सत्यः । जनार्दनः — रक्षाप्रतिबन्धकान् जनान् अर्दयति हिनस्तीति जनार्दनः । हंसः — संसारभयं भक्तानां हन्तीति हंसः । गृहीतहंसावतार इति वा । नारायणः — नारस्य जीवसमूहस्यायनं प्रवृत्तिर्यस्मादिति नारायणः सर्वप्रवर्तकः । लीलः —

74 b क. पिपीलकः कृती
7 c क. ड कालहर्ता च
75 cd क.ड नारायणो नीलो लीनो भक्ति-

जगद्व्यापाररूपा लीला अस्येति लीलः। **नीलः**—श्यामलः। **भक्तिपरायणः**—भक्त्या प्राप्तव्यः। भक्तिरेव परमयनं प्राप्तिसाधनं यस्मिन् सः। भक्त्येकलभ्य इत्यर्थः॥ ७५॥

**जानकीवल्लभो रामः विरामो विघ्ननाशनः।**
**सहभानुर्महाभानुः वीरबाहुर्महोदधिः॥ ७६॥**

**जानकीवल्लभः** जानक्याः सीतायाः वल्लभः प्रियः पतिः। जानकी वल्लभा प्रिया अस्येति वा। **रामः**—सर्वान्तर्यामितया रमत इति रामः। **विरामः**—विरमणं प्रलयः प्राणिनामस्मिन्निति विरामः। विरम्यते अस्मिन् रावणादिभिरिति विराम इति वा। विविधं रमयति रूपौदार्यादिभिर्विराम इति वा। **विघ्ननाशनः**—विघ्नानां नाशकः। **सहभानुः**—दीप्तिसहितः। श्रिया सह भाति प्रकाशत इति वा सहभानुः। सहस्रांशुरिति पाठे सहस्रकिरण इत्यर्थः। सर्वतो देदीप्यमान इति भावः। **महाभानुः** महासूर्यः सूर्यकोटिप्रकाशः। **वीरबाहुः**—विक्रान्ता बाहवो यस्य सः। वीरेषु बलवत्सु भाति प्रकाशत इति वा वीरभानुः।

'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥'

(गी. 10–41)

**महोदधिः**—गुणगणौघमहार्णवः॥ ७६॥

**समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।**
**गोकुलानन्दकारी च प्रतिज्ञापरिपालकः॥ ७७॥**

समुद्रादयः शब्दाः पर्यायाः गुणरत्नानामाकरभूत इत्यर्थः। यद्वा मुद्रा लक्ष्मीः तया सह वर्तत इति **समुद्रः**। आपो धीयन्तेऽस्मिन्निति **अब्धिः**।

---

76 b ङ विरामो विघनाशनः
76 c घ. सहस्रांशुर्महाभानुः
76 d ङ. वीरभानुर्महोदधिः

'सरसामस्मि सागरः' इति स्मरणात् । अकूपारः— कूर्मावतारः 'ओं नमो भगवते अकूपाराय' इति भागवते । पारं नद्यादेः कूलं मत्स्यावताररूपेण आवृणोतीति पारावारः । सरित्पतिः — सरितां पतिः समुद्रान्तर्यामी सरितः श्रीयमुनानद्याः पतिरिति वा । गोकुलानन्दकारी— गोकुलस्य गोसमूहस्य आनन्दजनकः । प्रतिज्ञापरिपालकः— प्रतिज्ञाया उक्तवाक्यस्य परिपालकः रक्षकः ।

'द्यौः पतेत् पृथिवी शीर्येत हिमवान् शकलीभवेत् ।
शुष्येत्तोयनिधिः कृष्णे न मे मोघं वचो भवेत् ॥'

इति ह्युक्तं भगवता कृष्णेन द्रौपदीं प्रति । 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति' (गी. ९-३१) इत्यादिकमिह भाव्यम् ॥ ७७ ॥

**मदारामः कृपारामः महारामो धनुर्धरः ।**
**पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः ॥ ७८ ॥**

मदा जना रमन्तेऽस्मिन्निति मदारामः । मतामारामो विश्रामस्थानमिति वा । मत्सु आरामो यस्येति वा । कृपाविशिष्टो रामः कृपारामः । 'चतुर्णां हि स धर्मात्मा भूतानां कुरुते दयाम्' इति रामायणे । कृपया भक्तेषु रमणं यस्येति वा । महारामः महान् स्वरूपेण गुणैश्च उत्कृष्टो रामः । महत्सु पूज्येषु आसमन्तात् रामो रमणं यस्येति वा । धनुर्धरः— उपासकानां प्रतिपक्षविनाशाय धनुर्धारयतीति तादृशः । पर्वतः पर्वत इव अप्रकम्प्यः । पर्वताकारः— पर्वतस्येवाकृतिः यस्य सः । गयः — गयारूपी गयायां विष्णुः संनिहित इति हि प्रथा । गेयः— स्तुत्यः । द्विजप्रियः— द्विजानां प्रीतिविषयः । द्विजाः प्रियाः प्रीतिविषया यस्येति वा ॥ ७८ ॥

**कम्बलाश्वतरो रामो रामायणप्रवर्तकः ।**
**द्यौर्दिवो दिवसो दिव्यो भव्यो भावी भयापहः ॥ ७९ ॥**

79 a क. कमलाश्व-
79 c ख. घ. द्यौर्दिवो
79 d ख. ङ. भाविभयापहः

**कम्बलाश्वतरः**— 'कम्बलो नागराजे स्यात्' इति मेदिनी। अश्वतरः फाल्गुने मासि सूर्यमण्डलनिवासी कश्चन सर्प इति विशिष्टाद्वैतकोशे। एवं च तादृशसर्परूप इत्यर्थः अत्र प्रतीयते। **रामः**—दाशरथिः। **रामायणप्रवर्तकः**—रामायणस्य प्रेरकः नायकः वाल्मीकिरूपेण रामायणं प्रवर्तयतीति वा। **द्यौः** द्युलोकनिवासः। **दिवः** दिवसः द्युलोकस्य प्रकाशकः। **दिव्यः**—दिवि अप्राकृतलोके भवः परमव्योमनिलयः। 'यो अस्याध्यक्षः परमे व्योमन्' इति श्रुतिः। **भव्यः**—कल्याणस्वरूपः। **भावी**—भावः भक्तजनेषु सद्बुद्धिः अस्यास्तीति भावी। **भयापहः**—सर्वेषां प्रपन्नानां भयमपहन्तीति भयापहः।

'सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम॥'

(रा. 6-18-33)

इति रामायणे॥ ७९॥

पार्वतीभाग्यसहितो भर्ता लक्ष्मीविलासवान्।
विलासी साहसी सर्वी गर्वी गर्वितलोचनः॥ ८०॥

पार्वत्याः भाग्येन कारणभूतेन सह वर्तमानो यो भर्ता शिवः तत्स्वरूपः। **लक्ष्मीविलासवान्**—लक्ष्म्याः यो विलासः शृङ्गारभावजचेष्टाविशेषः तत्पात्रभूतः। लक्ष्म्या सह विलासोऽस्यास्तीति वा **विलासी**—लक्ष्मीविषये गोपीविषये वा तादृशचेष्टाशीलः। **साहसी**—शत्रुषु दण्डधरः। 'साहसं तु दमो दण्डः' इत्यमरः। **सर्वी**—सर्वः प्रपञ्चः शरीरतया अस्यास्तीति सर्वी। **गर्वी**—अहङ्कारवान्। असमं गर्वो निरसनीयतया अस्यास्तीति वा। **गर्वितलोचनः** सञ्जातगर्वे सर्वोत्कृष्टे लोचने यस्य सः। 'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' (छा. 1-6-6) इति श्रुतिप्रसिद्धत्वात्॥ ८०॥

मुरारिर्लोकधर्मज्ञः जीवनो जीवनान्तकः ।
यमो यमादियमनो यामी यामविधायकः ॥ ८१ ॥

**मुरारिः**— मुरनामकस्यासुरस्य शत्रुः हन्ता । **लोकधर्मज्ञः**— लोकानां हितं धर्मं जानातीति तादृशः । 'धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः' (रा.1-1-2) इति रामायणे । **जीवनः**— सर्वेषां जन्तूनां प्राणनः । 'को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्' इति श्रुतिः । **जीवनान्तकः** मारकः । 'कालोऽस्मि लोकक्षयकृत् प्रवृद्धः' इति स्मरणात् । (गी.11-32) **यमः**— यमस्वरूपः । नियन्ता सर्वस्य जगत इति वा । 'यमः संयमतामहम्' इति गीतायाम् । (गी.10-29)

'यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥'

इति मनुस्मृतौ । **यमादियमनः** यमप्रभृतीनां नियन्ता । **यामी**— अन्तर्यामी । **यामविधायकः**— यामाख्यस्य कालप्रभेदस्य विधाता ॥ ८१ ॥

वसुली पांसुली पांसुः पाण्डुरर्जुनवल्लभः ।
ललिता चन्द्रिकामाली माली मालाम्बुजाश्रयः ॥ ८२ ॥

**वसुली**— वसु धनं लिनाति श्लेषयतीति वसुली । 'ली श्लेषणे' क्र्यादिः । धनप्रद इत्यर्थः । 'अन्नादो वसुदान' इति श्रुतिः । वंशुली इति पाठे वंशुलाः वंशोद्भवाः रुक्मिण्यादयः अस्य सन्तीति वंशुली । वंशली इति पाठे वंश वेणुं लाति आदत्त इत्यर्थः । **पांसुली**— पांसुश्लिष्टः गोपालवेषत्वात् तदुचितपांसुलिप्तशरीर इत्यर्थः । पांसुप्रचुरदेहः । **पांसुः**— व्रजरजोरूपः । यद्वा पंशयति नाशयति भक्तविरोधिन इति पांशुः । 'पशि नाशने' इति

81 c क. ङ. यमो यमार्दियमनो
ख. यमो यमादिर्यमनो
81 d क. यामनिपातकः
82 a क. ङ. वंशुली पांशुली पांशुः

धातुः । **पाण्डुः** — शुभ्रः । **अर्जुनवल्लभः** — अर्जुनस्य पार्थस्य वल्लभः प्रियः । अर्जुनः प्रियः यस्येति वा । **ललिता** — ईप्सिता 'लल ईप्सायाम्' इति धातोः तृच् । भक्तान् प्राप्तुमिच्छतीति तादृशः । **चन्द्रिकामाली** — चन्द्रिका मल्लिकापुष्पं तद्ग्रथिता माला धार्यत्वेन यस्य सः । **माली** — माला वैजयन्तीमाला अस्यास्तीति माली । **मालाम्बुजाश्रयः** — पद्ममालाधारी ॥ ८२ ॥

**अम्बुजाक्षो महायज्ञः दक्षः चिन्तामणिः प्रभुः ।**
**मणिर्दिनमणिश्चैव केदारो बदरीश्रयः ॥ ८३ ॥**

**अम्बुजाक्षः** — अम्बुजे पद्मे इव अक्षिणी नेत्रे यस्य सः पुण्डरीकदलामलायतेक्षणः । अम्बुजायां लक्ष्म्यां अक्षिणी यस्येति वा । **महायज्ञः** — महान्तः यज्ञाः आराधनरूपा यस्य सः । महायज्ञसमाराध्य इत्यर्थः । **दक्षः** — सर्वकर्माणि शीघ्रकारी समर्थः । 'दक्ष वृद्धौ शीघ्रार्थे च' जगद्रूपेण वर्धमानो वा । **चिन्तामणिः** — चिन्तामणिरिव चिन्तितसकलपुरुषार्थप्रदः । **प्रभुः** — भोगापवर्गादिफलप्रदानसमर्थः । **मणिः** — मणिरिव द्योतमानः सर्वश्रेष्ठो वा । **दिनमणिः** — सूर्यः । कोटिसूर्यप्रकाशः । **केदारः** — केदारनिवासी । के जले शङ्खासुरं दारयति नाशयतीति वा केदारः **बदरीश्रयः** — बदरिकाश्रमनिवासी नारायणः ॥ ८३ ॥

**बदरीवनसंप्रीतः व्यासः सत्यवतीसुतः ।**
**अमरारिनिहन्ता च सुधासिन्धुविधूदयः ॥ ८४ ॥**

**बदरीवनसंप्रीतः व्यासः** — बदरीमिश्रे वने प्रीतिमान् यः व्यासमुनिः तत्स्वरूपः । **सत्यवतीसुतः** — सत्यवत्याः पुत्रः । इदमपि व्यासस्य विशेषणम् ।

---

83 a ख.घ.ङ. महायक्षः
83 b ङ. चिन्तामणिप्रभुः
84 d ख. सिन्धुर्विधूदयः

'द्वीपे बदरिकामिश्रे बादरायणमच्युतम् ।
पराशरात्सत्यवती पुत्रं लेभे... .... ॥'

इति स्मृतेः । 'मुनीनामप्यहं व्यासः' (गी.10–37) इति गीतायाम् । अमरारिनिहन्ता — देवानां ये शत्रवो रावणादयः तेषां विनाशकः । सुधासिन्धुविधूदयः — समुद्रमथनकाले सिन्धोः समुद्रात् सुधायाः अमृतस्य विधोः चन्द्रस्य च उदयः उत्पत्तिः यस्मात् सः । अमृतचन्द्रादीनामुत्पत्तौ हेतुः । अथ वा सुधायाः सिन्धोर्विधोश्चोत्पत्तौ कारणभूतः । 'अतः समुद्रा गिरयश्च सर्वे' (तै. ना. 6 ) इति श्रुतिः ॥ ८४ ॥

**चन्द्रो रविः शिवः शूली चक्री चैव गदाधरः ।**
**श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥ ८५ ॥**

चन्द्रः — भक्तानामाह्लादकः । रविः — भास्करवत् शत्रूणां सन्तापकः ।

'चन्द्रकान्ताननं रामं अतीव प्रियदर्शनम् ॥ इति ।
(रा. 2-3-29)

'शरजालांशुमान् शूरः कपे रामदिवाकरः ।
शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥'

इति च रामायणे । शिवः — मङ्गलस्वरूपः । शूली — शूलायुधवान् शूलयत्यसुरान् व्यथयतीति वा । चक्री — चक्रायुधधरः । गदाधरः — कौमोदकीनाम्नीं गदां धारयतीति तादृशः । श्रीकर्ता — भक्तानामैश्वर्यप्रदः । श्रीपतिः — लक्ष्मीपतिः । श्रीदः — स्मरतां स्तुवतामर्चयतां श्रियं ददातीति श्रीदः । श्रीदेवः — श्रिया दीव्यति दीप्यत इति श्रीदेवः । 'श्रिया विरुरुचे रामः' इति रामायणे । देवकीसुतः — देवकीपुत्रः । 'देवकीपुत्राय कृष्णाय' इति छान्दोग्ये ॥८५॥

**श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः ।**
**वासुदेवोऽप्रमेयात्मा केशवो गरुडध्वजः ॥ ८६ ॥**

**श्रीपतिः** — लक्ष्मीपतिः भक्तसम्पदं पातीति वा। **पुण्डरीकाक्षः**— पद्मनेत्रः। **पद्मनाभः** — चतुर्मुखादिसकलजगत्स्रष्टृ पद्मं नाभौ यस्य सः। **जगत्पतिः** — जगत्स्वामी। **वासुदेवः** — वसुदेवसूनुः।

'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥'

(वि.पु. 1– –12)

इत्युक्तलक्षणो वा। **अप्रमेयात्मा** — अपरिच्छेद्यस्वरूपः। केनापि प्रत्यक्षादिना प्रमाणेन इयत्तया ज्ञातुमशक्य इति वा। **केशवः** — ब्रह्मरुद्रेशः, केशिहन्ता स्निग्धनीलकुन्तलवानिति वा। **गरुडध्वजः** — गरुड एव ध्वजो यस्य सः ॥ ८६ ॥

**नारायणः परं धाम देवदेवो महेश्वरः।**
**चक्रपाणिः कलापूर्णो वेदवेद्यो दयानिधिः ॥ ८७ ॥**

**नारायणः** — नरसमूहस्याश्रयः सर्वान्तर्यामीति वा। **परं धाम** — उत्कृष्टं तेजः। चराचरात्मककृत्स्नप्रपञ्चाधारभूत इति वा। **देवदेवः** — देवानां देवः। **महेश्वरः** — ईश्वराणां ईश्वरः। 'तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्' (श्वे. 6–7) इति श्रुतिः। **चक्रपाणिः** — चक्रं सुदर्शनाख्यं पाणौ यस्य सः। **कलापूर्णः** — षोडशकलापरिपूर्णश्चन्द्र इव प्रकाशमानः। चतुष्षष्टिकलाभिज्ञ इति वा। **वेदवेद्यः** — वेदप्रतिपाद्यः, वेदैकप्रमाणकः। **दयानिधिः** — करुणालयः। परदुःखनिराचिकीर्षा दया तद्वानित्यर्थः ॥ ८७ ॥

**भगवान् सर्वभूतेशो गोपालः सर्वपालकः।**
**अनन्तो निर्गुणो नित्यो निर्विकल्पो निरञ्जनः ॥ ८८ ॥**

**भगवान्** षाड्गुण्यपरिपूर्णः।

---

88 c ख. अनन्तो निर्गुणोऽनन्तो

'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥'

(वि.पु. 6-5-79)

इति विष्णुपुराणे । **सर्वभूतेशः**—सर्वेषां प्राणिनामीश्वरः । **गोपालः**—गवां रक्षकः । **सर्वपालकः**—सर्वेषां रक्षकः । **अनन्तः**—देशतः कालतः वस्तुतश्च परिच्छेदरहितः । 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.आ. 14) इति श्रुतेः । 'नास्त्यन्तो विस्तरस्य मे' (गी. 10-19) इति गीतायाम् । **निर्गुणः** सत्त्वादिगुणत्रयरहितः । जरादिहेयगुणरहित इति वा । 'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः' (वि पु. 1-9-44) 'विना हेयैर्गुणादिभिः' (वि. पु. 6-5-79) इत्यादिपुराणवचनान्यत्रानुसन्धेयानि। **नित्यः**—उत्पत्ति-विनाशरहितः । 'नित्यो नित्यानां चेतनश्चेतनानाम्' (श्वे.6-13,कठ.5-13) इति श्रुतिः । **निर्विकल्पः**— देवमनुष्यादिभेदरहितः । **निरञ्जनः**—दोष-लेपरहितः ॥ ८८ ॥

**निराधारो निराकारः निराभासो निराश्रयः ।**
**पुरुषः प्रणवातीतो मुकुन्दः परमेश्वरः ॥ ८९ ॥**

**निराधारः**— आधाररहितः । 'भूतभृन्न च भूतस्थः' (गी. 9-5) इति गीतायाम् । **निराकारः**—आकाररहितः । **निराभासः**—आभासो भ्रमः दोषो वा तद्रहितः । **निराश्रयः**— आश्रयरहितः । **पुरुषः**— पुरु बहु सनोति ददातीति पुरुषः । अस्य शब्दस्य बहूनि व्युपत्त्यन्तराण्यपि सन्ति, यथा पुरुषु भूरिषु उत्कर्षशालिषु सत्त्वेषु सीदतीति वा, पुरूणि भुवनानि संहार-समये स्यति नाशयति इति वा, पूर्णत्वात् पूरणात् सदनाद्वा पुरुष इत्यादि । **प्रणवातीतः**—प्रणवापेक्षयापि उत्कृष्टः । प्रणवं अतिशयेन इतः वाचकत्वेन प्राप्त इति वा । **मुकुन्दः**— मुक्तिं ददातीति मुकुन्दः । पृषोदरादित्वात् साधुः । **परमेश्वरः**— उत्कृष्टः ईश्वरः । परायाः उत्कृष्टायाः मायाः लक्ष्म्याः ईश्वरः पतिरिति वा ॥ ८९ ॥

**क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः ।**
**विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः ॥ ९० ॥**

**क्षणावनिः** — उत्सवभूमिः, उत्सवपात्रभूतः । **सार्वभौमः** — सर्वभूमेरीश्वरः । **वैकुण्ठः** — कुण्ठा गतेः प्रतिघातः । 'कुठि गतिप्रतिघाते' । गतिप्रतिघातश्चात्र संश्लेषविघातः । स च विगतो येषां ते विकुण्ठाः तेषामयं वैकुण्ठः । जगदारम्भे विश्लिष्टानि भूतानि परस्परं संश्लेषयतीत्यर्थः ।

'मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना ।
वायुश्च तेजसा सार्धं वैकुण्ठत्वं ततो मम ॥'

इति भारते शान्तिपर्वणि (३४२-८०) श्रीरामेऽपि प्रसिद्धोऽयं महिमा यत् विश्लेषस्वभाववस्तूनां संश्लेषणं नाम

'राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम्'

इति । **भक्तवत्सलः** — भक्तेषु प्रीतिमान् । **विष्णुः** — सर्वव्यापी । **दामोदरः** — दाम उदरे यस्य सः यशोदया रज्ज्वा उदरे बद्धः श्रीकृष्ण इति भागवतादौ प्रसिद्धम् । अनेन आश्रितपरतन्त्रत्वं सूच्यते । **कृष्णः** — वसुदेवसूनुः । **माधवः** — लक्ष्मीपतिः । **मथुरापतिः** — मथुरानगरस्य स्वामी ।

'एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः ।
नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् ॥' ९० ॥

**देवकीगर्भसम्भूतो यशोदावत्सलो हरिः ।**
**शिवः सङ्कर्षणः शम्भुर्भूतनाथो दिवस्पतिः ॥ ९१ ॥**

**देवकीगर्भसम्भूतः** — देवक्याः गर्भे प्रादुर्भूतः । **यशोदावत्सलः** यशोदायाः प्रियः । **हरिः** — पापहारकः विष्णुः । **शिवः** — मङ्गलकरः ।

---

90 a क. क्षणावर्तिः
90 d ख. ङ. मधुरापतिः

सङ्कर्षणः — संहारसमये चिदचितां कर्षणात् सङ्कर्षणः । शम्भुः—शं सुखं भवत्यस्मादिति शम्भुः । भूतनाथः— भूतानामीश्वरः । दिवस्पतिः— स्वर्गलोकाधिपतिः ॥ ९१ ॥

अव्ययः सर्वधर्मज्ञः निर्मलो निरुपद्रवः ।
निर्वाणनायको नित्यो नीलजीमूतसंनिभः ॥ ९२ ॥

यस्य स्वरूपं गुणो विभवो वा न कदापि प्रच्यवते सोऽव्ययः । निर्विकार इति यावत् । सर्वधर्मज्ञः—सर्वान् धर्मान् जानातीति । निर्मलः दोषरहितः । निरुपद्रवः— इतरकर्तृकपीडारहितः । निर्वाणनायकः — निर्वाणं सुखं मोक्षः तस्य नायकः प्रापकः । 'णीञ् प्रापणे'। 'अमृतस्यैष सेतुः' (मु. 1-2-5,6) इति श्रुतेः । नित्यः उत्पत्तिविनाशरहितः । नीलजीमूतसन्निभः— नीलमेघसदृशः ॥ ९२ ॥

कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः ।
हृषीकेशः पीतवासा वसुदेवप्रियात्मजः ॥ ९३ ॥

कलाक्षयः— षोडशकलानां निवासभूतः । 'क्षि निवासगत्योः' । सर्वज्ञः सामान्यतो विशेषतश्च सर्वं जानातीति तादृशः । 'यः सर्वज्ञः सर्ववित्' (मु. 1-1-9) इति श्रुतिः । कमलारूपतत्परः— कमलायाः लक्ष्म्याः यत् रूपं आकृतिः तत्र तत्परः आसक्तः । हृषीकेशः — इन्द्रियाणां नियामकः । पीतवासाः —पीताम्बरः । वसुदेवप्रियात्मजः — वसुदेवस्य प्रीतिपात्रभूतः पुत्रः । वसुदेवप्रियायाः देवक्या आत्मज इति वा । देवकीगर्भसम्भूतः ॥ ९३ ॥

नन्दगोपकुमारार्यः नवनीताशनो विभुः ।
पुराणपुरुषः श्रेष्ठः शङ्खपाणिः सुविक्रमः ॥ ९४ ॥

---

92 cd. नित्योऽनिलजीमूत-

94 b ख.च. नवनीताशनः प्रभुः

**नन्दगोपकुमारार्यः**— नन्दाख्यस्य गोपालस्य कुमारार्यः पुत्रश्रेष्ठः। नन्दगोपकुमारश्चासौ अर्यः सर्वेषां स्वामीति वा। 'अर्यः स्वामिवैश्ययोः'। (पा.सू. 3-1-103) **नवनीताशनः**— गोपगृहेषु स्थितानि नवनीतानि चौर्येणाश्नुते भुङ्क्ते इति नवनीताशनः। **विभुः**— सर्वव्यापी। **पुराणपुरुषः**— सनातनः पुरुषः। **श्रेष्ठः**—सर्वोत्कृष्टः। 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतेः। **शङ्खपाणिः**— शङ्खः पाञ्चजन्यः पाणौ हस्ते यस्य सः। **सुविक्रमः**— अतिशयितपराक्रमशाली। 'शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः' (रा. 6-106-6) इति रावणेनापि स्तुतः पराक्रमो यस्य ॥ ९४ ॥

**अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः।**
**गदाधरः सुरार्तिघ्नो गोविन्दो नन्दकायुधः ॥ ९५ ॥**

**अनिरुद्धः**— अवतारेषु न केनापि निरुद्धः, शत्रुभिरनभिभूतः। **चक्ररथः**— युद्धं विना यात्रोत्सवादौ सुखभ्रमणार्थो रथः चक्ररथ इत्युच्यते; सोऽस्यास्तीति अर्शआद्यच्। 'असौ पुष्यरथश्चक्रयानं न समराय यत्' इत्यमरः (२-८-५१)। चक्रधर इति पाठे सुदर्शनाख्यचक्रायुधधारीत्यर्थः। **शार्ङ्गपाणिः**—शार्ङ्गाख्यं धनुः पाणौ यस्य सः। **चतुर्भुजः**— चत्वारो बाहवो यस्य सः। **गदाधरः**— गदाख्यायुधधारी। **सुरार्तिघ्नः**— सुराणां देवानां आर्तिं रावणादिकृतपीडां हन्तीति तादृशः। **गोविन्दः**— गाः वेदादिरूपाः वाचः प्रतिपादकत्वेन विन्दते प्राप्नोतीति तादृशः। **नन्दकायुधः**— नन्दकाख्यः खड्गः आयुधं यस्य सः ॥ ९५ ॥

**वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः।**
**तृणावर्तान्तको भीमसाहसी बहुविक्रमः ॥ ९६ ॥**

**वृन्दावनचरः**— वृन्दावनसञ्चारी श्रीकृष्णः। **शौरिः**— शूरस्य वसुदेवस्यापत्यम्। शूरकुलोत्पन्न इति वा। **वेणुवाद्यविशारदः**— वेणुवादने

95 a क. अनिरुद्धश्चक्रधरः
96 d ख.घ.ङ. साहसो बहु-

चतुरः। तृणावर्तान्तकः — तृणावर्तनामकासुरसंहारकः। भीमसाहसी — भयङ्करसाहसकर्मकर्ता। भीमवत् बलिष्ठ इति वा। बहुविक्रमः — विपुलपराक्रमशाली, विविधपराक्रमशाली वा ॥ ९६ ॥

शकटासुरसंहारी बकासुरविनाशनः।
धेनुकासुरसंहारी पूतनारिर्नृकेसरी ॥ ९७ ॥

शकटासुरसंहारी — शकटरूपेण प्रादुर्भूतस्यासुरस्य संहर्ता। बकासुरविनाशनः — बकरूपेण आविर्भूतस्यासुरस्य हन्ता। धेनुकासुरसंहारी — धेनुकनामकस्यासुरस्य संहारकः। पूतनारिः — पूतनायाः शत्रुः। एते वृत्तान्ताः भागवते प्रसिद्धाः। नृकेसरी — नरश्रेष्ठः। 'उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्' ॥ ९७ ॥

पितामहो गुरुस्साक्षात् प्रत्यगात्मा सदा शिवः।
अप्रमेयः प्रभुः प्राज्ञोऽप्रतर्क्यः स्वप्नवर्धनः ॥ ९८ ॥

पितामहः — चतुर्मुखरूपः। साक्षात्गुरुः — मुख्यगुरुः। पितामहाय चतुर्मुखाय प्रथमतः वेदोपदेष्टृत्वात् साक्षात् गुरुः विष्णुः। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे. 6–18) इति श्रुतेः। प्रत्यगात्मा — स्वस्मै स्वयं प्रकाशमानः आत्मा। सदाशिवः — सर्वदा कल्याणः। अप्रमेयः — स्वरूपेण गुणैश्चापरिच्छेद्यः। 'त्वमप्रमेयश्च दुरासदश्च' (रा.4-24-31) इति रामायणे। प्रभुः — प्रभवत्यस्मात् सर्वं जगदिति प्रभुः। नितान्तकान्तरूपतया सर्वहृदयहरणे प्रभवति समर्थ इति वा प्रभुः। 'रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः' इति (रा.5-35-8) रामायणे। प्राज्ञः — प्रकृष्टज्ञानवान्। ज्ञाने प्रकर्षश्च सर्वविषयकत्वम्। सर्वज्ञ इत्यर्थः।

---

97 c ख.घ. धेनुकासुरसङ्घातः
98 a ख.ङ. गुरुः साक्षी
98 c ख. अप्रमेयप्रभुः
cd क. प्राज्ञः प्रतर्क्यः

'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' (बृ.6-3-21) इति श्रुतौ प्राज्ञशब्दः परमात्मनि प्रयुक्तः। अथ वा प्रकृष्टा आज्ञा यस्य सः प्राज्ञः, अप्रतिहतशासनः। अप्रतर्क्यः — केवलतर्केण ज्ञातुमशक्यः। 'नैषा तर्केण मतिरापनेया' (कठ.2-9) इति श्रुतेः। स्वप्नवर्धनः — स्वप्नेन प्राणिनो वर्धयतीति स्वप्नवर्धनः। सत्कर्मकर्तॄणां प्राणिनां स्वप्ने शुभसूचकवस्तु दर्शयित्वा तन्मुखेनाभिवृद्धिप्रद इत्यर्थः॥ ९८॥

धन्यो मान्यो भवो भावो धीरः शान्तो जगद्गुरुः।
अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवसंस्तुतः॥ ९९॥

धन्यः — भक्तानामभीष्टपूरणेन कृतार्थः। मान्यः — सर्वैः सत्करणीयः सर्वेश्वरत्वात्। भवः — भवत्यस्मात् सर्वमिति भवः। भावः — सकलप्रपञ्चविशिष्टो भवतीति भावः। धीरः — प्राणिनां धीः बुद्धिःताम् ईरयति प्रेरयति इति धीरः। 'धियो यो नः प्रचोदयात्' (गायत्री) आपद्यपि चाञ्चल्यरहित इति वा।

'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः'।
(कुमारसम्भव)

शान्तः — अशनायापिपासाद्यूर्मिषट्करहितः। अशनायापिपासे शोकमोहौ जरामृत्यू च ऊर्मिषट्कम्। जगद्गुरुः — जगतां गुरुः। अन्तर्यामी — अन्तः प्रविश्य नियन्ता। 'एष ते अन्तर्याम्यमृतः' (बृ.5-7-3) इति अन्तर्यामिब्राह्मणे। ईश्वरः — निरुपाधिकैश्वर्यवान्। समर्थः अप्रतिहतशक्तिमानिति वा। 'परास्य शक्तिर्विविधैव श्रूयते'। (श्वे. 6-8) दिव्यः — द्युलोकनिलयः। 'दिव्यो ह्यमूर्तः पुरुषः' (मु. 2-1-2) इति मुण्डके। दैवज्ञः — शुभाशुभकर्मज्ञः। देवसम्बन्धिरहस्यज्ञ इति वा। देवसंस्तुतः — देवैः ब्रह्मरुद्रादिभिः सम्यक् स्तुतः॥ ९९॥

99 d ख.घ. दैवज्ञो देवतागुरुः

क्षीराब्धिशयनो धाता लक्ष्मीवाँल्लक्ष्मणाग्रजः ।
धात्रीपतिरमेयात्मा चन्द्रशेखरपूजितः ॥ १०० ॥

क्षीराब्धौ क्षीरसमुद्रे शेते इति क्षीराब्धिशयनः । 'एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः' । धाता — सर्वजगत्स्रष्टा । 'धाता यथापूर्वमकल्पयत्' । लक्ष्मीवान् — लक्ष्म्या नित्ययोगवान् । नित्ययोगे मतुप् । लक्ष्मीर्हि भगवतो वक्षसि नित्यं संनिहिता । लक्ष्मणाग्रजः—लक्ष्मणस्य पूर्वजो भ्राता । 'रामानुजं लक्ष्मणपूर्वजं च' इति रामायणे । धात्रीपतिः— धात्र्याः सकललोकमातुः लक्ष्म्याः पतिः भर्ता । 'धात्री जनन्यामलकीवसुमत्युपमातृषु' इति मेदिनी । अमेयात्मा — अपरिच्छेद्यस्वरूपः । चन्द्रशेखरपूजितः — परमशिवेन पूजितः ॥ १०० ॥

लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः ।
कोटिमन्मथसौन्दर्यः जगन्मोहनविग्रहः ॥ १०१ ॥

लोकसाक्षी — लोकवृत्तं सर्वमपि साक्षात पश्यतीति । जगच्चक्षुः— चक्षुर्वत् सर्वं जगत् पश्यतीति । पुण्यचारित्रकीर्तनः — पुण्यं पावनं चारित्रकीर्तनं यस्य सः । यस्य भगवतः चरित्रकीर्तनं परमपावनं पुण्यजनकं च भवति सः ।

'वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि ।
वक्तारं पृच्छकं श्रोतॄन् तत्पादसलिलं यथा ॥'

इति भागवते (१०-१-१६) । कोटिमन्मथसौन्दर्यः — कोटिसङ्ख्याकमन्मथानां यत्सौन्दर्यं स्यात तादृशसौन्दर्ययुक्तः । जगन्मोहनविग्रहः जगतः सर्वस्य मोहजनको विग्रहो यस्य सः । यदीयशरीरदर्शनेन मुग्धः सर्वो जनः अन्यत् किमपि न जानाति तादृशः ।

'मणिविडम्बिनि तस्य मनोहरे वपुषि मग्नमना मुनिमण्डली ।
जपममुञ्चत होमममुञ्चत व्रतममुञ्चत वेदममुञ्चत ॥'

इति हि तद्विग्रहः वर्ण्यते पुराणादिषु ॥ १०१ ॥

मन्दस्मिताननो गोपो गोपिकापरिवेष्टितः ।
फुल्लारविन्दनयनः चाणूरान्ध्रनिषूदनः ॥ १०२ ॥

**मन्दस्मिताननः** — मन्दं मनाक् स्मितं हासः आनने यस्य सः ।

'ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत् ॥'

इति वचनं अमरसुधायामुदाहृतम् (पृ. ८५)। **गोपः** — गोपालजातीयः **गोपिकापरिवेष्टितः** — गोपस्त्रीभिः परिवृतः । **फुल्लारविन्दनयनः** — विकसिते पद्मसदृशे नेत्रे यस्य सः। **चाणूरान्ध्रनिषूदनः** — चाणूरनामकमसुरमल्लं आन्ध्रदेशीयं मुष्टिकं च निषूदितवानिति तादृशः । भागवते दशमस्कन्धे चतुश्चत्वारिंशत्तमेऽध्यायेऽयं वृत्तान्तः द्रष्टव्यः ॥ १०२ ॥

इन्दीवरदलश्यामो बर्हिबर्हावतंसकः ।
मुरलीनिनदाह्लादः दिव्यमाल्याम्बरावृतः ॥ १०३ ॥

**इन्दीवरदलश्यामः** — नीलोत्पलदलवत् श्यामवर्णः । **बर्हिबर्हावतंसकः** — मयूरपिच्छशिरोऽलङ्कारः । **मुरलीनिनदाह्लादः** — वेणुगानेन सर्वानाह्लादयतीति तादृशः। **दिव्यमाल्याम्बरावृतः** — अप्राकृतमालावस्त्राभ्यां वेष्टितः ॥ १०३ ॥

सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवान् शुभलक्षणः ॥ १०४ ॥

**सुकपोलयुगः** — शोभनकपोलयुगलवान् । **सुभ्रूयुगलः** — शोभनभ्रूयुग्मः । **सुललाटकः** — शोभनललाटवान् । **कम्बुग्रीवः** — कम्बुः शङ्खः

---

102 a ख.घ. मन्दस्मिततमो गोपो
ab ङ. गोपगोपिका
105 a क. पीनवक्षाश्चतु

इव ग्रीवा कन्धरा यस्य सः। **विशालाक्षः**—विशाले अक्षिणी नेत्रे यस्य सः। **लक्ष्मीवान्**—अवयवशः समुदायेन च शोभावान्। **शुभलक्षणः**—शुभानि सामुद्रिकालक्षणानि यस्य सः॥ १०४॥

**पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः।**
**कलङ्करहितः शुद्धः दुष्टशत्रुनिबर्हणः॥ १०५॥**

**पीनवक्षाः**—पीनं वक्षो यस्य सः। चत्वारो बाहवः यस्य स **चतुर्बाहुः**। चतस्रः मूर्तयः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्या यस्य स **चतुर्मूर्तिः**। **त्रिविक्रमः**—त्रयो विक्रमाः पादाक्रमणानि यस्य सः। 'त्रीणि पदा विचक्रमे' इति श्रुतेः। त्रीन् लोकान् क्रमते आक्रामतीति वा त्रिविक्रमः

'त्रिरित्येवं त्रयो लोकाः कीर्तिता मुनिसत्तमैः।
क्रमते तांस्त्रिधा सर्वांस्त्रिविक्रम इति श्रुतः॥'

इति हरिवंशे (३-८८-५१) त्रिषु लोकेषु विक्रमः पराक्रमो यस्येति वा। **कलङ्करहितः**—निर्मलः। **शुद्धः**—अनाघ्राताज्ञानादिदोषगन्धः। **दुष्टशत्रुनिबर्हणः**—दुष्टानां शत्रूणां कंसादीनां विनाशनः॥ १०५॥

**किरीटकुण्डलधरः कटकाङ्गदमण्डितः।**
**मुद्रिकाभरणोपेतः कटिसूत्रविराजितः॥ १०६॥**

किरीटं कुण्डले च धारयतीति **किरीटकुण्डलधरः**। **कटकाङ्गदमण्डितः**—वलयकेयूराभ्यां भूषितः। **मुद्रिकाभरणोपेतः**—मुद्रिकाख्याभरणयुक्तः। मुद्रिका अङ्गुलीयकम्। तदाख्याभरणयुक्तः। **कटिसूत्रविराजितः**—कटिसूत्रेण दीप्यमानः॥ १०६॥

**मञ्जीररञ्जितपदः सर्वाभरणभूषितः।**
**विन्यस्तपादयुगलो दिव्यमङ्गलविग्रहः॥ १०७॥**

मञ्जीररञ्जितपदः—मञ्जीरेण नूपुरेण रञ्जितौ आक्लिष्टौ आश्लिष्टौ पादौ यस्य सः। सर्वाभरणभूषितः—पूर्वोक्तैरनुक्तैश्च सर्वाभरणैरलङ्कृतः। विन्यस्तपादयुगलः—भक्तानां शिरसि विशेषेण न्यस्तं निक्षिप्तं पादयुगलं येन सः। दिव्यमङ्गलविग्रहः—दिव्यं अप्राकृतं मङ्गलं शुभप्रदं शरीरं परव्यूहादिरूपं यस्य सः ॥ १०७ ॥

गोपिकानयनानन्दः पूर्णचन्द्रनिभाननः।
समस्तजगदानन्दः सुन्दरो लोकनन्दनः ॥ १०८ ॥

गोपिकानयनानन्दः—गोपकन्यानां नयनयोरानन्दजनकः। पूर्णचन्द्रनिभाननः—षोडशकलापूर्णचन्द्रसदृशमाननं मुखं यस्य सः। समस्तजगदानन्दः—सर्वजगतामानन्दनः। कृष्णरूपदर्शनेन न केवलं पुमांसः स्त्रियो वा, अपि तु पक्षिपशुप्रभृतयोऽप्यानन्दभरेण व्यामुग्धा इति भागवते वर्ण्यते बहुत्र। सुन्दरः—विश्वातिशायिसौन्दर्यवान्। अत एव लोकनन्दनः दृष्टिमात्रेण लोकानामानन्दजनकः ॥ १०८ ॥

यमुनातीरसञ्चारी राधामन्मथवैभवः।
गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः ॥ १०९ ॥

यमुनातीरसञ्चारी—गोपस्त्रीणामवलोकनादिदानेनानन्दनार्थं यमुनातीरे सञ्चरणशीलः। राधामन्मथवैभवः—राधायाः मन्मथातिशयः यस्मात् सः। गोपनारीप्रियः—गोपस्त्रीणां प्रियः। तथापि दान्तः—निगृहीतेन्द्रियः। गोपीवस्त्रापहारकः—गोपीनां स्नानार्थं यमुनामवगाढवतीनां तीरन्यस्तानि यानि वस्त्राणि तेषामपहर्ता ॥ १०९ ॥

शृङ्गारमूर्तिः श्रीधामा तारको मूलकारणम्।
सृष्टिसंरक्षणोपायः क्रूरासुरविभञ्जनः ॥ ११० ॥

शृङ्गारमूर्तिः—रतिजनिका मूर्तिः यस्य सः।

'कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्
नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ।
तन्नः प्रसीद परमेश्वर मा स्म छिन्द्याः
आशां भृतां त्वयि चिरादरविन्दनेत्र ॥'

इति हि गोप्य ऊचुः । श्रीधामा —श्रिया लक्ष्म्या पत्न्या हेतुना धाम निरतिशयं तेजः यस्य सः ।

'अप्रमेयं हि तत्तेजः यस्य सा जनकात्मजा' (रा. 3-3‍-18) इति रामायणे । तारकः—भक्तान् वैरिचोरव्याध्यादिभयेभ्यः तारयतीति तादृशः । संसारसागरात् तारयतीति वा । मूलकारणम् —आदिभूतं कारणम् । सृष्टिसंरक्षणोपायः — जगत्सृष्टिस्थित्योः कारणभूतः । क्रूरासुरविभञ्जनः — हिंस्राणामसुराणां विनाशनः विशेषेण नाशकः ॥ ११० ॥

नरकासुरसंहारी मुरारिररिमर्दनः ।
आदितेयप्रियो दैत्यभीकरो यदुशेखरः ॥ १११ ॥

नरकासुरसंहारी —नरनामकस्यासुरस्य नाशकः । नरकासुरसंहारवृत्तान्तः भागवते एकोनषष्ठितमेऽध्याये । मुरारिः—मुरनामकस्यासुरस्य शत्रुः। मुरसंहारवृत्तान्तोऽपि तत्रैवाध्याये । अरिमर्दनः —अन्येषामपि कामक्रोधादिशत्रूणां विनाशनः । आदितेयप्रियः —आदितेयानां देवानां प्रीतिपात्रभूतः। आदितेयाः प्रियाः यस्येति वा । दैत्यभीकरः —दैत्यानां असुराणां भीतिकरः । यदुशेखरः — यदुश्रेष्ठः यदुवंशस्योद्धारकत्वात् ॥ १११ ॥

जरा :।
पुण्यश्लोकः कीर्तनीयः यादवेन्द्रो जगन्नुतः ॥ ११२ ॥

---

111 a ख.घ. नरकासुरहारी च
111 b क.ख.ङ. मुरारिर्वैरिमर्दनः
घ. मुरारिर्वैरमर्दनः
111 d क. यदुश्रेष्ठः
ख.घ. भीकरस्येन्दुशेखरः

जरासन्धकुलध्वंसी —जरासन्धवंशनाशनः । कंसारातिः—कंसशत्रुः कंसघातकः । सुविक्रमः — शोभनपराक्रमः । पुण्यश्लोकः — पुण्यकीर्तिः । कीर्तनीयः — कीर्तनयोग्यः । 'सततं कीर्तयन्तो माम्' इति गीतायाम् । यादवेन्द्रः — यादवश्रेष्ठः । जगन्नुतः — सर्वैः स्तुतः ॥ ११२ ॥

रुक्मिणीरमणः सत्यभामाजाम्बवतीप्रियः ।
मित्रविन्दानाग्नजितीलक्ष्मणासमुपासितः ॥ ११३ ॥

रुक्मिणीरमणः — रुक्मिण्याः रतिकरो भर्ता । सत्यभामाजाम्बवत्योः — प्रियः भर्ता । मित्रविन्दया नाग्नजित्या लक्ष्मणया च सम्यगुपासितः। एताः सर्वाः कृष्णः उद्वाहानिति भागवते अष्टपञ्चाशत्तमेऽध्याये ॥ ११३ ॥

सुधाकरकुले जातोऽनन्तप्रबलविक्रमः ।
सर्वसौभाग्यसम्पन्नो द्वारकापत्तने स्थितः ॥ ११४ ॥

सुधाकरकुले जातः — चन्द्रवंशे समुत्पन्नः । अनन्तप्रबलविक्रमः अपरिच्छेद्यः प्रकृष्टः पराक्रमो यस्य सः । सर्वसौभाग्यसम्पन्नः — सर्वविधसौभाग्यसमृद्धः । द्वारकापत्तने स्थितः — द्वारकानिलयः ॥ ११४ ॥

भद्रासूर्यसुतानाथो लीलामानुषविग्रहः ।
सहस्रषोडशस्त्रीशो भोगमोक्षैकदायकः ॥ ११५ ॥

भद्रासूर्यसुतानाथः —भद्रानाम्नी श्रुतकीर्तेः सुता, सूर्यसुता कालिन्दी अनयोः नाथः पतिः । भद्राकालिन्दीभ्यां कृष्णस्य विवाहः भागवतेऽष्टपञ्चाशत्तमेऽध्याये द्रष्टव्यः । लीलामानुषविग्रहः — लीलार्थं स्वीकृतः मानुषा-

---

113 c क. नाग्निजिती-

114 b क. अनन्तः प्रबल-

114 d ख.घ. द्वारकायामुपस्थितः

कारः रामकृष्णादिदेहः यस्य सः। सहस्रषोडशस्त्रीशः—षोडशसहस्रसङ्ख्याकस्त्रीणां पतिः। अयं वृत्तान्तः भागवते एकोनषष्ठितमेऽध्याये द्रष्टव्यः। भोगमोक्षैकदायकः—भोगस्य ऐहिकामुष्मिकसुखानुभवस्य मोक्षस्य चैकः मुख्यः दायकः दाता ॥ ११५ ॥

**वेदान्तवेद्यः संवेद्यो वैद्यो ब्रह्माण्डनायकः ।**
**गोवर्धनधरो नाथः सर्वजीवदयापरः ॥ ११६ ॥**

**वेदान्तवेद्यः**—वेदान्तैः उपनिषद्भिः वेद्यः ज्ञेयः। 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेः। **संवेद्यः**—निःश्रेयसार्थिभिः सम्यक् ज्ञातुमर्हः। **वैद्यः**—सर्वाः विद्याः वेद जानातीति वैद्यः। विद्याशब्दात् 'तदधीते तद्वेद' (पा.सू. 4-2-59) इत्यण्। धन्वन्तरिरूपो वा। **ब्रह्माण्डनायकः**—ब्रह्माण्डानामीश्वरः। **गोवर्धनधरः**—गोवर्धनाख्यं पर्वतं इन्द्रकृतवृष्टेस्सकाशात् गवां गोपालानां च रक्षार्थं छत्ररूपेण धृतवान्। **नाथः**—सर्वस्वामी। **सर्वजीवदयापरः**—सर्वेषु जीवेषु दयातिशयवान्। सर्वजीवानां दुःखापाकरणेच्छुः ॥ ११६ ॥

**मूर्तिमान् सर्वभूतात्मा आर्तत्राणपरायणः ।**
**सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः ॥ ११७ ॥**

**मूर्तिमान्**—परव्यूहादिप्रशस्तरूपवान्। **सर्वभूतात्मा**—सर्वेषां भूतानामात्मा अन्तःप्रविश्य नियन्ता। 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा' (तै.आरण्य.11-20) इति श्रुतेः। **आर्तत्राणपरायणः**—आर्तानां दुःखपीडितानां जन्तूनां त्राणे रक्षणे परायणः आसक्तिमान्। **सर्वज्ञः**—सामान्यतो विशेषतश्च सर्वं जानातीति। **सर्वसुलभः**—सर्वेषां सुलभः सुखेन लब्धुं शक्यः। यथा अनर्घः मूल्याभासेन लभ्येत तथा अतिमहानपि उपायाभासेन

नामसङ्कीर्तनादिनापि लब्धुं शक्यः। पत्रपुष्पफलादिभिर्वा भक्तिमात्रसमर्पितैः सुखेन लभ्यः।

'पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु।
भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै कथं न क्रियते प्रयत्नः॥'

(गरुडपुराणे 1-227-33)। **सर्वशास्त्रविशारदः**— सर्वेषु शास्त्रेषु निष्णातः। सान्दीपिनेः गुरोः सकाशे सर्वाणि शास्त्राणि अधिजगे हि श्रीकृष्णः॥११७॥

**षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः।**
**महानुभावः कैवल्यदायको लोकनायकः॥ ११८॥**

**षड्गुणैश्वर्यसम्पन्नः**— षड्गुणरूपं यदैश्वर्यं ईश्वरस्वभावः तत्सम्पन्नः। ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः। षड्गुणैः अष्टैश्वर्यैश्च सम्पन्न इति वा। **पूर्णकामः**— स्वत एवावाप्तसमस्तकामः। सदा अभिमतसकलभोगोपकरणसम्पन्नः। **धुरन्धरः**— सकलप्राणिनां जगतां च जन्मस्थितिलयरूपं धुरं वहतीति तादृशः। **महानुभावः**— महान् श्लाघनीयः अनुभावः प्रभावः यस्य सः। **कैवल्यदायकः**— मोक्षप्रदः। 'मोक्षमिच्छेज्जनार्दनात्'। **लोकनायकः**— सर्वेषां लोकानां नाथः। 'लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति' (रा. 4-4-18)॥११८॥

**आदिमध्यान्तरहितः शुद्धसात्त्विकविग्रहः।**
**असमानः समस्तात्मा शरणागतवत्सलः॥ ११९॥**

**आदिमध्यान्तरहितः**— आदिः मध्यमन्तश्च एतैर्विरहितः सततैकस्वरूप इत्यर्थः। **शुद्धसात्त्विकविग्रहः**— शुद्धसत्त्वमयाप्राकृतमूर्तिमान्। 'न तस्य प्राकृता मूर्तिः मांसमेदोऽस्थिसम्भवा'। 'न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः' इति च। **असमानः**— न विद्यते समानो यस्य सः।

---

118 cd क.ङ. कैवल्यनायको लोक-
119 c ख असमानसमस्तात्म

'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतेः। समस्तात्मा — सर्वेषामात्मा। 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' (गी. 10–20) इति गीतायाम्। शरणागतवत्सलः — वत्सेषु गोरिव शरणागतेषु स्नेहवान्। 'विदितः स हि धर्मज्ञः शरणागतवत्सलः। तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥' (रा. 5-21-20) इति सीता रावणं प्रति प्राह ॥ ११९ ॥

उत्पत्तिस्थितिसंहारकारणं सर्वकारणम्।
गम्भीरः सर्वभावज्ञः सच्चिदानन्दविग्रहः ॥ १२० ॥

उत्पत्तिस्थितिसंहाराणाम् कारणम्, अत एव सर्वकारणम्। गम्भीरः— दुरवगाह्याभिप्रायः। क्षोभकारणे सत्यप्यक्षुब्धहृदयो वा। सर्वभावज्ञः — सर्वेषां भावं हृद्गतं जानातीति। 'अज्ञातं नास्ति ते किंचित्' (रामायणे) (6–17–35)। सच्चिदानन्दविग्रहः — सत् निर्विकारः चित् ज्ञानवत् स्वयंप्रकाशः आनन्दः अनुकूलत्वेन भासमानः विग्रहः मूर्तिः यस्य सः। 'ज्ञानानन्दमया लोकाः' इति श्रीवैकुण्ठस्थपदार्थानां ज्ञानानन्दस्वरूपत्वकथनात् तत्रस्थितभगवद्विग्रहस्य ज्ञानानन्दस्वरूपत्वम्। अथवा सच्चिदानन्दस्वरूपः ॥ १२० ॥

विष्वक्सेनः सत्यसन्धः सत्यवाक् सत्यविक्रमः।
सत्यव्रतः सत्यरतः सत्यधर्मपरायणः ॥ १२१ ॥

विष्वक्सेनः — विष्वक् इति सर्वार्थकमव्ययम्। सर्वा सेना दैत्य-सेना अञ्चति पलायते यस्य युद्धोद्योगमात्रेण स विष्वक्सेनः। सर्वव्यापिनी सेना अस्येति वा। सत्यसन्धः — सत्या सन्धा प्रतिज्ञा यस्य सः।

'अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्।
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥' (रा. 3–10–19)

121 b ख.घ. सत्यवान् सत्य-
121 c ख.घ. सत्यव्रतः सत्यसंध:
121 d ख. सर्वधर्म-

इति रामवचनम् । सत्यवाक् सत्या वाक् यस्य सः ।

'तुष्येत्तोयनिधिः कृष्णे न मे मोघं वचो भवेत्'

इति श्रीकृष्णवचनम् । सत्यविक्रमः — सत्यः पराक्रमो यस्य सः । सत्यव्रतः — सत्यं आश्रितपरिपालनसङ्कल्परूपं व्रतं यस्य सः । 'अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम' इति रामायणे । सत्यरतः सत्यभाषणे तत्परः । 'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन' इति रामायणे । सत्यधर्मपरायणः — सत्ये सत्यभाषणे, धर्मे शास्त्रविहिते च परायणः नियतः । 'वर्ते एव हि कर्मणि' (गी. 3-22) इति गीतायाम् । सत्यरूपधर्मपरो वा ॥१२१॥

आपन्नार्तिप्रशमनः द्रौपदीमानरक्षकः ।
कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः ॥ १२२ ॥

आपन्नार्तिप्रशमनः — आपन्नानां आपद्गतानां आर्तेः दुःखस्य प्रशमनः निवर्तकः । द्रौपदीमानरक्षकः — द्रौपद्याः गौरवस्य रक्षकः । सभायां दुश्शासेन वस्त्रेऽपह्रियमाणे गोविन्द इत्युच्चैराक्रन्दन्तीं द्रौपदीं वस्त्रदीर्घीकरणेन ररक्षेति भारते । कन्दर्पजनकः — प्रद्युम्नपिता, स्वदर्शनेन स्त्रीणां कामजनको वा । प्राज्ञः — प्रकृष्टज्ञानवान् । जगन्नाटकवैभवः — जगद्व्यापाराख्यं नाटकमेव वैभवं ऐश्वर्यं यस्य सः ॥ १२२ ॥

भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः ।
दमघ[illegible] बाणबा[illegible]खण्डनः ॥ १२३ ॥

भक्तिवश्यः — भक्तेः परतन्त्रः । 'भक्तिक्रीतो जनार्दनः' । गुणातीतः — सत्त्वरजस्तमोगुणत्रयमतिक्रान्तः तद्रहितः । सर्वैश्वर्यप्रदायकः — ऐहिकामुष्मिकमोक्षरूपसर्वैश्वर्याणां प्रदाता । दमघोषसुतद्वेषी — शिशुपालशत्रुः । बाणबाहुविखण्डनः — बाणासुरस्य बाहोः छेत्ता ॥ १२३ ॥

भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः ।
कौन्तेयप्रियबन्धुश्च पार्थस्यन्दनसारथिः ॥ १२४ ॥

भीष्मभक्तिप्रदः — भीष्माचार्यस्य भक्तिं प्रदत्तवान् । दिव्यः — अप्राकृतलोकस्वामी । कौरवान्वयनाशनः — कौरववंशस्य घातकः । कौन्तेयप्रियबन्धुः — पाण्डवानां प्रियो बन्धुः । पार्थस्यन्दनसारथिः — अर्जुनरथस्य सारथिः । आश्रितपारतन्त्र्यमनेनोच्यते ॥ १२४ ॥

नारसिंहो महावीरः स्तम्भजातो महाबलः ।
प्रह्लादवरदः सत्यो देवपूज्योऽभयङ्करः ॥ १२५ ॥

नारसिंहः — कृतनरसिंहावतारः नरावयवानां सिंहावयवानां च समावेशो यत्र वपुषि तादृशवपुष्मानित्यर्थः । महावीरः — महापराक्रमशीलः । स्तम्भजातः — स्तम्भेऽवतीर्णः । नारायणः सर्वत्र वर्तत इति प्रह्लादेनोक्ते कंचित् स्तम्भं प्रदर्श्य अत्रास्ति वेति हिरण्यकशिपुना पृष्टे ओमिति प्रह्लादेनोक्ते स्तम्भं ताडयति हिरण्यकशिपौ सद्यस्ततः नरसिंहः प्रादुर्भूत इति कथा । महाबलः — महत् बलं यस्य सः बलिनां बलवत्तमः । प्रह्लादवरदः — भक्ताग्रेसरस्य प्रह्लादस्याभीष्टदाता । सत्यः - अविकृतः । देवपूज्यः — देवानां ब्रह्मादीनां पूज्यः । अभयङ्करः — सर्वेभ्यः प्राणिभ्योऽभयं करोतीति । 'अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम' इति रामायणे ॥ १२५ ॥

उपेन्द्र इन्द्रावरजो वामनो बलिबन्धनः ।
गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः ॥ १२६ ॥

उपेन्द्रः — इन्द्रानुजः ।

'द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप ।
तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिताः ॥'

इति वचनमुदाहरन्ति । यद्वा इन्द्रस्योपरि उपेन्द्रः इन्द्रात् उत्कृष्टः । इन्द्रावरजः — इन्द्रस्यानुजः । वामनः — स्वीकृतवामनावतारः । याचनार्थे हि वामनरूपोऽभूत । द्रष्टॄन् स्वकान्त्या वामानि सुखानि नयतीति वा वामनः ।

छ पुस्तके 125 श्लोकपर्यन्तमेवोपलभ्यते ।

संभजनीय इति वा । 'मध्ये वामनमासीनं विश्वेदेवा उपासते' इति कठोपनिषदि । **बलिबन्धनः**— पदत्रययाचनेन बलिं बद्धवान् वशीकृतवान् । **गजेन्द्रवरदः** — गजेन्द्रस्य वरप्रदः ।

'नाहं कलेबरस्यास्य त्राणार्थं मधुसूदन ।
करस्थकमलान्येव पादयोरर्पितुं तव ॥'

इत्युक्तरीत्या नक्राक्रान्तेन करीन्द्रेण स्वावचितपुष्पाणि भगवत्पादयोर्मरणात् प्राक् समर्पणीयानीति बुद्ध्या 'आदिमूल' इत्याहूतः भगवान् सद्यः स्वयमागत्य तत्पुष्पस्वीकरणेन तदीयाभीष्टं पूरयामासेति पुराणेषु । **स्वामी** — सर्वं जगत् स्वं यस्य सः । **सर्वदेवनमस्कृतः** — सर्वैरितरैर्देवैः प्रणतः ॥ १२६ ॥

**शेषपर्यङ्कशयनः वैनतेयरथो जयी ।**
**अव्याहतबलैश्वर्यसम्पन्नः पूर्णमानसः ॥ १२७ ॥**

**शेषपर्यङ्कशयनः** - आदिशेषाख्यः पर्यङ्कः शयनं यस्य सः । **वैनतेयरथः** — विनतासुतो गरुडः वाहनं यस्य सः । **जयी** — जयशीलः । सर्वभूतान्यतिशयितुं शीलमस्येति वा । **अव्याहतबलैश्वर्यसम्पन्नः** — परैरप्रतिहताभ्यां बलैश्वर्याभ्यां युक्तः । **पूर्णमानसः** — सर्वदा पूर्णं अभिलषितपूर्तियुक्तं मनो यस्य सः ॥ १२७ ॥

**योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः ।**
**योगिहृत्पङ्कजावासो योगमायासमन्वितः ॥ १२८ ॥**

**योगेश्वरेश्वरः**— कल्याणगुणयोगवताम् ईश्वराणामीश्वरः । **साक्षी** — भूतभविष्यद्वर्तमानसकलवस्तुसाक्षाद्द्रष्टा । **क्षेत्रज्ञः** — क्षेत्राणि तत्तज्जीवानुगुणानि शरीराणि जानातीति क्षेत्रज्ञः ।

'क्षेत्राणि हि शरीराणि बीजं चापि शुभाशुभम् ।
तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते ॥'

---

128 a क. योगीश्वरेश्वरः

इति महाभारते (शान्ति ३५१-६)। **ज्ञानदायकः** — भक्तिमतां स्वविषयकज्ञानप्रदाता। 'शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्' इति महाभारते। 'मत्तः स्मृतिर्ज्ञानमपोहनं च' (गी. 15-35) इति गीतायाम्। **योगिहृत्पङ्कजावासः** — योगिनां हृदयपङ्कजं वासस्थानमस्य। **योगमायासमन्वितः** — जीवासाधारणमनुष्यत्वादिसंस्थानयोगरूपया मायया समाविष्टः। अचिन्त्यशक्तिसमन्वितो वा ॥ १२८ ॥

**नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः ।**
**सुषुम्नामार्गसञ्चारी देहस्यान्तरसंस्थितः ॥ १२९ ॥**

**नादबिन्दुकलातीतः** — नादं बिन्दुं कलां चातीत्य स्थितः। नादः बिन्दुः कला च मन्त्रावयवविशेषा इत्याहुः। मन्त्रशास्त्रमन्वेषणीयम्। **चतुर्वर्गफलप्रदः** — धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयप्रदाता। **सुषुम्नामार्गसञ्चारी** — सुषुम्नाख्यनाडीमार्गेऽन्तर्यामितया सञ्चरतीति। **देहान्तरसंस्थितः** शरीरस्यान्तः अन्तर्यामिरूपेण स्थितः ॥ १२९ ॥

**देहेन्द्रियमनःप्राणसाक्षी चेतःप्रसादकः ।**
**सूक्ष्मः सर्वगतो देही ज्ञानदर्पणगोचरः ॥ १३० ॥**

**देहेन्द्रियमनःप्राणानां साक्षी** — स्वयमुदासीनः सन् तद्व्यापारद्रष्टा। **चेतःप्रसादकः** — चित्तशुद्धिप्रदः। **सूक्ष्मः** — सर्वान्तः प्रवेशयोग्यः अतीन्द्रिय इति वा। **सर्वगतः** — सर्वव्यापी। 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' (मु.उ. 1-1-6)। **देही** — सकलजगच्छरीरकः। **ज्ञानदर्पणगोचरः** — ज्ञानाख्ये दर्पणे द्रष्टव्यः ॥ १३० ॥

**तत्त्वत्रयात्मकोऽव्यक्तः कुण्डली समुपाश्रितः ।**
**ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः ॥ १३१ ॥**

---

129 d ख.घ. सन्देहस्यान्तरस्थितः

**तत्त्वत्रयात्मकः** — चिदचिदीश्वरतत्त्वत्रयस्वरूपः। **अव्यक्तः** — अप्रकाशः। 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' (गी.7-25) इति गीतायाम्। **कुण्डली** — कुण्डलाख्याभरणमण्डितः। **समुपाश्रितः** — आर्तैर्भक्तैरुपाश्रितः। **ब्रह्मण्यः** — ब्रह्मशब्देन तपः वेदाः विप्राः ज्ञानं चोच्यते, तेभ्यो हितः ब्रह्मण्यः। **सर्वधर्मज्ञः** — शास्त्रप्रतिपाद्यान् सर्वान् धर्मान् जानातीति। 'विदितः सहि धर्मज्ञः' (रा.5-21 20) 'धर्मज्ञश्च कृतज्ञश्च' (१-१-२) इति रामायणे। **शान्तः** — अशनायापिपासाद्यूर्मिषट्करहितः। **दान्तः** — निगृहीतेन्द्रियः। **गतक्लमः** — ग्लानिरहितः ॥ १३१ ॥

श्रीनिवासः सदानन्दः विश्वमूर्तिर्महाप्रभुः।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ १३२ ॥

**श्रीनिवासः** — लक्ष्म्याः वासस्थानम्। यस्य वक्षसि श्रीरनपायिनी वसति। **सदानन्दः** — सदा आनन्दो यस्य सः। **विश्वमूर्तिः** — विश्वं मूर्तिः शरीरं यस्य सः। **महाप्रभुः** — प्रभूणामपि प्रभुः। **सहस्रशीर्षा** — अनन्तानि शिरांसि यस्य सः। **सहस्राक्षः** — अनन्तानि अक्षीणि यस्य सः। **सहस्रपात्** — अनन्तचरणः। सर्वज्ञत्वात् सर्वशक्तित्वाच्च सर्वत्र शिरःचक्षुःपादकार्यकारणसमर्थः इत्यर्थः। **पुरुषः** — पुरु सनोति ददातीति पुरुषः बहुप्रदः। पुरि हृदयगुहायां शेत इति वा ॥ १३२ ॥

समस्तभुवनाधारः समस्तप्राणरक्षकः।
समस्तसर्वभावज्ञो गोपिकाप्राणवल्लभः ॥ १३३ ॥

**समस्तभुवनाधारः** — सर्वेषां लोकानामाधारः। 'एष सेतुर्विधरण एषां लोकानामसम्भेदाय' (बृ. 6-4-22) इति श्रुतेः। **समस्तप्राणरक्षकः** — सर्वेषां प्राणस्य रक्षकः। 'को ह्येवान्यात् कः प्राण्यात्; यदेष आकाश

132 a ख.घ. सदानन्दी

आनन्दो न स्यात्' (तै.आन.7) इति श्रुतेः। **समस्तसर्वभावज्ञः** — समस्तानां प्राणिनां ये सर्वे भावाः हृद्गताः अभिप्रायाः तान् जानातीति तादृशः। **गोपिकाप्राणवल्लभः** — गोपस्त्रीणां प्राणवत् प्रियः ॥ १३३ ॥

नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमङ्गलः।
व्यूहार्चितो जगन्नाथः श्रीवैकुण्ठपुराधिपः ॥ १३४ ॥

नित्यमुत्सवः यस्य सः **नित्योत्सवः**। नित्यं सौख्यं सुखं यस्य सः **नित्यसौख्यः**। **नित्यश्रीः** — नित्या श्रीर्यस्य सः। नित्यैश्वर्यः। लक्ष्म्या नित्ययोगवानिति वा। **नित्यमङ्गलः** — सर्वदा कल्याणः। **व्यूहार्चितः** वासुदेवसङ्कर्षणादिव्यूहरूपेण भक्तैः पूजितः।

'कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते'

इति पौष्करसंहितायाम्। **जगन्नाथः** — जगतां स्वामी अधिपतिः। **श्रीवैकुण्ठपुराधिपः** — श्रीवैकुण्ठाख्यस्याप्राकृतनगर्याः अधिपतिः ॥ १३४ ॥

पूर्णानन्दघनीभूतः गोपवेषधरो हरिः।
कलापकुसुमश्यामः कोमलः शान्तविग्रहः ॥ १३५ ॥

**पूर्णानन्दघनीभूतः** — परिपूर्णेनानन्देन व्याप्तः। आनन्दांशलेशरहितत्वं घनीभूतत्वम्। **गोपवेषधरः** — गोपालाकृतिधर्ता। **हरिः** — भक्तिमतां हृदयं हरतीति हरिः। **कलापकुसुमश्यामः** — कलापपुष्पवत् श्यामवर्णः। **कोमलः** — सुकुमारशरीरः। मृदुस्वभाव इति वा। **शान्तविग्रहः** शान्तस्वरूपः विषयसुखेष्वसङ्गः। 'निष्कलं निष्क्रियं शान्तम्' (श्वे.6-19) इति श्रुतेः। सत्यपि समुद्रेकहेतौ माहात्म्यसमुद्रे निस्तरङ्गसमुद्रवत् अनुद्रिक्तस्वरूप इति वा ॥ १३५ ॥

गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः।
वेणुवादरतः श्रेष्ठो देवानां हितकारकः ॥ १३६ ॥

**गोपाङ्गनावृतः** — गोपस्त्रीभिः परिवृतः । **वृन्दावनसमाश्रयः** — वृन्दावनं वासस्थानं यस्य सः । **वेणुवादरतः** — वेणुवादने आसक्तिमान् । **श्रेष्ठः** — सर्वोत्कृष्टः, पुरुषोत्तमत्वात् । **देवानां हितकारकः** — इन्द्रादीनां देवानां अपेक्षितार्थसाधकः ॥ १३६ ॥

**बालक्रीडासमासक्तो नवनीतस्य तस्करः ।**
**गोपालकामिनीजारश्चौरजारशिखामणिः ॥ १३७ ॥**

**बालक्रीडासमासक्तः** — बालानां याः क्रीडाः तासु आसक्तः । अत एव **नवनीतस्य तस्करः** चोरः । आश्रितपारतन्त्र्यादिकं उलूखलबन्धनादिना प्रकाशयितुं नवनीतचौर्यमकरोत् कृष्ण इत्याहुः । **गोपालकामिनीजारः** — गोपपत्नीनामुपपतिः पतिवत् भोक्ता । अत एव **चौरजारशिखामणिः** — चोराणां जाराणां च श्रेष्ठः ॥ १३७ ॥

**परं ज्योतिः पराकाशः परावासः परिस्फुटः ।**
**अष्टादशाक्षरो मन्त्रो व्यापको लोकपावनः ॥ १३८ ॥**

**परं ज्योतिः** — उत्कृष्टज्योतिस्स्वरूपः । 'परं ज्योतिरुपसम्पद्य' (छा. ८-12-2) 'यदतः परो दिवो ज्योतिर्दीप्यते' (छा.3-13-7) इत्यादिश्रुतेः । **पराकाशः** — आसमन्तात् काशते प्रकाशते इत्याकाशः परः उत्कृष्टश्चासावाकाशश्च पराकाशः । 'दहरोऽस्मिन्नन्तर आकाशः' (छा.8-1-1) 'आकाशो ह वै नामरूपयोर्निर्वहिता' (छा.8-14-1) इत्यादिश्रुतेः । **परावासः** परः उत्कृष्टः आवासः निवासस्थानम् । 'निवासवृक्षः साधूनाम्' इति रामायणे । **परिस्फुटः** — अत्यन्तं स्फुटतया प्रकाशमानः, भक्तानामिति शेषः । **अष्टादशाक्षरो मन्त्रः** — अष्टादशाक्षरयुक्तमन्त्रप्रतिपाद्यः । स च

137 d ख. चोरजार-

138 a ख. परज्योतिः

मन्त्रो सन्तानगोपालमन्त्रादिः **व्यापकः** — सर्वव्यापी । **लोकपावनः** — सर्वेषां लोकानां पवित्रत्वापादकः ॥ १३८ ॥

सप्तकोटिमहामन्त्रशेखरो देवशेखरः ।
विज्ञानज्ञानसन्धानस्तेजोराशिर्जगत्पतिः ॥ १३९ ॥

**सप्तकोटिमहामन्त्रशेखरः** — सप्तकोटिसङ्ख्याकाः महामन्त्राः शेखरायमाणाः यस्य सः । तावन्मन्त्रश्रेष्ठैः प्रतिपाद्य इत्यर्थः । **देवशेखरः** — देवेषु श्रेष्ठः । **विज्ञानज्ञानसन्धानः** — विशिष्टं ज्ञानं सामान्यतः तत्त्वयाथात्म्यज्ञानम् । अनयोः सन्धानः सन्धाता संश्लेषयिता । **तेजोराशिः** — तेजःपुञ्जरूपः । **जगत्पतिः** — जगत्स्वामी जगत्पालको वा ॥ १३९ ॥

भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः ।
भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः ॥ १४० ॥

**भक्तलोकप्रसन्नात्मा** — भक्तजनेष्वनुग्रहशीलं मनः यस्य सः । **भक्तमन्दारविग्रहः** — भक्ताभीष्टदातृकल्पवृक्षस्वरूपः । **भक्तदारिद्र्यदमनः** भक्तानां दारिद्र्यस्य नाशनः । कुचेलोपाख्यानादौ प्रसिद्धमिदम् । **भक्तानां प्रीतिदायकः** — स्वस्वरूपविग्रहादिप्रदर्शनेन भक्तानां प्रीतिजनकः ॥ १४० ॥

भक्ताधीनमनाः पूज्यः भक्तलोकशिवङ्करः ।
भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृन्तनः ॥ १४१ ॥
अपारकरुणासिन्धुर्भगवान् भक्ततत्परः ॥ १४२ ॥

**भक्ताधीनमनाः** — भक्तजनपरतन्त्रं मनो यस्य सः । **पूज्यः** — पूजार्हः । **भक्तलोकशिवङ्करः** — भक्तजनानां भद्रप्रदः । **भक्ताभीष्टप्रदः** भक्तानामभीष्टं फलं प्रकर्षेण ददातीति तादृशः । **सर्वभक्ताघौघनिकृन्तनः**— सर्वेषां भक्तानां पापसमूहस्य नाशनः । **अपारकरुणासिन्धुः** — पाररहितः दयासमुद्रः । **भगवान्** षाड्गुण्यपरिपूर्णः परमात्मा । **भक्ततत्परः** — भक्तेषु आसक्तिमान् ॥ १४१-१४२ ॥

## अथ फलश्रुतिः

अथ निरुक्तगोपालसहस्रनामस्तोत्रानुसन्धानस्य फलान्युच्यन्ते—

स्मरणात् पापराशीनां खण्डनं मृत्युनाशनम् ॥ १ ॥

पूर्वोक्तगोपालसहस्रनाम्नां स्मरणात् अनादिकालसंचितानां पापराशीनां पापसमूहानां खण्डनं नाशनं भवति । तथा मृत्युनाशनं मृत्योः नाशनं भवति। तथा मृत्युनाशनं मृत्योः नाशनं भवति । गोपालनामसहस्रकं स्वस्मरणमात्रेणैव स्मर्तुः पापसमूहखण्डकं मृत्युनाशकं च भवतीत्यर्थः । मृत्युशब्देन संसार उच्यते ॥ १ ॥

वैष्णवानां प्रियकरं महारोगनिवारणम् ।
ब्रह्महत्यासुरापानं परस्त्रीगमनं तथा ॥ २ ॥

वैष्णवानां विष्णुभक्तानां प्रियकरं प्रीतिजनकमेतत्सहस्रनामानुसन्धानम्। एतत्पठनेन वैष्णवाः सन्तुष्टा भवन्तीत्यर्थः । तथा महारोगनिवारणं महतां रोगाणां संनिपातज्वरादीनां निवर्तकम् । ब्रह्महत्यासुरापानं ब्राह्मणहननात्मकं सुरापानात्मकं च पापं नश्यतीत्युत्तरत्र सम्बन्धः । नाशोऽत्र निष्फलता । ब्राह्मणहननादिकं कृतमपि सहस्रनामपठनमहिम्ना अनर्थाय न भवतीत्यर्थः । परस्त्रीगमनात्मकं पापमपि नश्यति ॥ २ ॥

परद्रव्यापहरणं परद्वेषसमन्वितम् ।
मानसं वाचिकं कायं यत्पापं पापसम्भवम् ॥ ३ ॥

परद्रव्यापहरणम् — अन्यदीयद्रव्यापहरणरूपम् । परद्वेषसमन्वितं परस्मिन् द्वेषेण सहितं, मानसं — मनसा चिन्तितम्, वाचिकं — वाचा उच्चारितम्,

---

ख.घ. पुस्तकयोः 'स्मरणात् पापराशीनाम्' इत्यतः प्राक् 'इति श्रीराधिकानाथसहस्रं नाम कीर्तितम्' इत्यर्धमधिकं दृश्यते ।

1 cd क. स्मरणात् पापराशीनां पठनान्मृत्युनाशनम्

2 b क. महादारिद्रनाशनम्

3 b क. नरद्वेष-

3 d घ. पादसम्भवम्

कायं—शरीरेण कृतम्। मनसा परानिष्टचिन्तनात्मकं वाचा परानिष्टकथनात्मकं शरीरेण परानिष्टचेष्टात्मकं च यत् पापं तत् सर्वं नश्यति। एवं पापसम्भवं पापादुत्पन्नं पापं च नश्यति ॥ ३ ॥

सहस्रनामपठनात् सर्वं नश्यति तत्क्षणात्।
महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान् ॥ ४ ॥

तदाह—सहस्रनामपठनादिति। महादारिद्र्ययुक्तः—महता दारिद्र्येण समन्वितः यः विष्णुभक्तिमान् विष्णौ भक्तियुक्तः अत एव वैष्णवः ॥४॥

कार्तिक्यां सम्पठेद्रात्रौ शतमष्टोत्तरं क्रमात्।
पीताम्बरधरो धीमान् सुगन्धैः पुष्पचन्दनैः ॥ ५ ॥

कार्तिक्यां रात्रौ कृत्तिकानक्षत्रयुक्तायां रात्रौ अष्टोत्तरं शतं सम्पठेत् अष्टोत्तरशतवारं क्रमेण सम्यक् पठेत् करणत्रयसारूप्येण अक्षरभ्रंशादिकं विना पठेत्। पाठप्रकारमाह—पीताम्बरेत्यादि। पीताम्बरधरः पीतपट्टवस्त्रधारी सन्। सुगन्धैः सुरभिगन्धैः पुष्पचन्दनैः पुष्पैश्चन्दनैश्च पुस्तकं पूजयित्वेत्युत्तरत्रान्वयः। धीमान्—सहस्रनामपठनविधिज्ञः ॥ ५ ॥

पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च।
राधाध्यानाङ्कितो धीरो वनमालाविभूषितः ॥ ६ ॥

नैवेद्यादिभिश्च पुस्तकं गोपालसहस्रनामग्रन्थं पूजयित्वा। राधाध्यानाङ्कितः—राधायाः ध्यानेन निरन्तरचिन्तनेन अङ्कितः तन्मय इत्यर्थः। धीरः अचञ्चलः। वनमाला विभूषितः वैजयन्त्याख्यमालयालंकृतः सन् ॥ ६ ॥

---

4 b क. सर्वे नश्यन्ति
4 c क. महादारिद्र-
5 a क. कार्तिक्यां यः पठेत्
5 b क. पठेत् for क्रमात्
5 d क. सुगन्धपुष्प-
ख. घ. सुगन्धिपुष्प-
6 a क. पुस्तकं वाचयित्वा च

शतमष्टोत्तरं देवि पठेन्नामसहस्रकम् ।
चैत्रशुक्ले च कृष्णे च कुहूसंक्रान्तिवासरे ॥ ७ ॥

नामसहस्रकं अष्टोत्तरशतवारं हे देवि पठेत् । चैत्रशुक्ले चैत्रमासि शुक्लपक्षे कृष्णे च कृष्णपक्षे च कुहूसंक्रान्तिवासरे कुह्वाम् अमावास्यायां संक्रान्तिवासरे संक्रमणदिने च ॥ ७ ॥

पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत् क्षणात् ।
तुलसीमालया युक्तो वैष्णवो भक्तितत्परः ॥ ८ ॥

प्रयत्नेन पठनीयम् । क्षणात् क्षणकालेन त्रैलोक्यं भक्तिपारवश्येन मोहयेत् व्यामुग्धं कुर्यात् । तुलसीमालया तुलसीदलग्रथितमालया तुलसीमणिमालया वा युक्तः भक्तितत्परः भक्त्यासक्तः वैष्णवः ॥ ८ ॥

रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे ।
ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः ॥ ९ ॥

रविवारे भानुवासरे शुक्रे च शुक्रवासरे च । द्वादश्यां तिथौ श्राद्धवासरे श्राद्धदिने च । ब्राह्मणं पूजयित्वा सत्कृत्य, विधानतः शास्त्रोक्तविधिना भोजयित्वा च ॥ ९ ॥

पठेन्नामसहस्रं च ततः सिद्धिः प्रजायते ।
महानिशायां सततं वैष्णवो यः पठेत् सदा ॥ १० ॥

---

7 c क. चैत्रे शुक्ले च कृष्णे च
ख. चैत्रे कृष्णे च शुक्ले च
घ. चैत्रशुक्ले च कृष्णे च
8 c क. तुलसीमालसंयुक्तो
9 a क. शुक्ले च

नामसहस्रं नाम्नां सहस्रं पठेत् । ततः—पठनात् सिद्धिः अभीप्सित-प्राप्तिः प्रजायते—भवति । यः वैष्णवः महानिशायां सततं पठेत्, तस्य—॥ १० ॥

देशान्तरगता लक्ष्मीः समायाति न संशयः ।
त्रैलोक्ये च महादेवि सुन्दर्यः काममोहिताः ॥ ११ ॥

देशान्तरगता—अन्यदेशं प्रति गता, लक्ष्मीः समागच्छति नात्र संशयः । एवं हे महादेवि! त्रैलोक्येऽपि काममोहिताः कामपीडिताः सुन्दर्यः ॥ ११ ॥

मुग्धाः स्वयं समायान्ति वैष्णवं च भजन्ति ताः ।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥ १२ ॥

मुग्धाः सत्यः स्वयं समायान्ति तथा वैष्णवं विष्णुभक्तं सहस्रनामपठितारं भजन्ति प्राप्नुवन्ति । रोगी रोगवान् रोगात् प्रमुच्येत । बद्धः संसारी बन्धनात् संसारात् मुच्येत मुक्तो भवेत ॥ १२ ॥

गुर्विणी जनयेत्पुत्रं कन्या विन्दति सत्पतिम् ।
राजानो वश्यतां यान्ति किं पुनः क्षुद्रमानवाः ॥ १३ ॥

गुर्विणी गर्भिणी पुत्रं जनयेत् प्रसुवीत । कन्या सत्पतिं सन्तं भर्तारं विन्दति प्राप्नुयात् । राजानः वश्यतां अधीनतां यान्ति प्राप्नुयुः । क्षुद्रमानवाः अल्पमनुष्याः किं पुनः! वश्यतां यान्तीत्यत्र किमु वक्तव्यमस्ति ॥ १३ ॥

सहस्रनामश्रवणात् पठनात् पूजनात् प्रिये ।
धारणात् सर्वमाप्नोति वैष्णवो नात्र संशयः ॥ १४ ॥

---

13 a क. गर्भिणी जनयत्

13 cd क. राजा च वश्यतां याति किं पुनः क्षुद्रमानुषाः

गोपालसहस्रनाम्नामन्यैरुच्चार्यमाणानां श्रवणात् तथा स्वयं पठनात् अविस्मरणेन कण्ठस्थीकरणाच्च वैष्णवः अभीष्टं सर्वं प्राप्नोति नात्र संशयः ॥ १४ ॥

वंशीवटे चान्यवटे तथा पिप्पलकेऽथ वा ।
कदम्बपादपतले गोपालमूर्तिसंनिधौ ॥ १५ ॥

वंशादिवृक्षसमीपे गोपालमूर्तिसमीपे च । उत्तरत्रान्वयः ॥ १५ ॥

यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम् ।
कृष्णेनोक्तं राधिकायै मयि प्रोक्तं तथा शिवे ॥ १६ ॥

यो वैष्णवः विष्णुभक्तः पूर्वोक्तरीत्या इदं स्तोत्रं पठेत् स हरिमन्दिरं विष्णुस्थानं गच्छति । अयं विषयः राधायै कृष्णेनोक्तः । तथा शिवे मयि च प्रोक्तम् ॥ १६ ॥

नारदाय पुरा प्रोक्तं नारदेन प्रकाशितम् ।
मया तुभ्यं वरारोहे प्रोक्तमेतत्सुदुर्लभम् ॥ १७ ॥
गोपनीयं प्रयत्नेन न प्रकाश्यं कथंचन ।
शठाय पापिने चैव लम्पटाय विशेषतः ॥ १८ ॥

नारदेन प्रोक्तं प्रकाशितं चैतत् स्तोत्रं तुभ्यं मया प्रोक्तम् । महता प्रयत्नेनेदं गूहनीयम्, केनापि प्रकारेण न प्रकाशनीयम् । शठाय गूढविप्रियकृते

---

15 a क. वंशीवटे चार्यवटे

16 d क. मया प्रोक्त पुरा शिवे
ख. मयि प्रोक्तं पुरा शिवे
घ. मया प्रोक्तं पुरा शिवम्

17 a क.ख.घ. नारदाय मया प्रोक्तम्

17 b क. मया तव वरारोहे
ख.घ. मया त्वयि वरारोहे

18 b क. न प्रकाश्यं कदाचन

पापिने दुष्कृतिने विशेषतः लम्पटाय दुराशायुक्ताय चेदं न प्रकाशनीयं न दातव्यम् ॥ १७–१८ ॥

न दातव्यं न दातव्यं न दातव्यं कदाचन ।
देयं शिष्याय शान्ताय विष्णुभक्तिरताय च ॥ १९ ॥

त्रिरुक्त्या शठादिभ्यो दानमत्यन्तनिषिद्धमिति प्रतीयते । शान्तिमते विष्णुभक्ताय चोपदेष्टव्यम् । 'तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय' 'इदं ते नातपस्काय नाभक्ताय कदाचन' इत्यादिकमत्र मानम् ॥ १९ ॥

गोदानब्रह्मयज्ञादेर्वाजपेयशतस्य च ।
अश्वमेधसहस्रस्य फलं पाठे भवेद्ध्रुवम् ॥ २० ॥

गोदानादेर्यत् फलं तदस्य स्तोत्रस्य पाठेन लभ्येतेत्यर्थः ॥ २० ॥

मोहनं स्तम्भनं चैव मारणोच्चाटनादिकम् ।
यद्यद्वाञ्छति चित्तेन तत्तत् प्राप्नोति वैष्णवः ॥ २१ ॥

शुभमोहनादिरूपं फलमपि यदि वाञ्छति तत्रावश्यमेतत्स्तोत्रपाठेन तत् फलमाप्नुयादित्यर्थः ॥ २१ ॥

एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः ।
आहारं ब्राह्मणे दत्त्वा दक्षिणां स्वर्णभूषणम् ॥ २२ ॥

सुगन्धयुक्तद्रव्यतैलकैः स्नात्वा स्वर्णभूषणदक्षिणाभिः सह ब्राह्मणाय आहारं दत्त्वा— ॥ २२ ॥

19 c क. देयं शान्ताय शिष्याय

20 ab क. गोदानं ब्रह्मयज्ञश्च वाजपेयशतं तथा ।

तत आरम्भकर्तास्य सर्वं प्राप्नोति मानवः ।
शतावृत्त सहस्र च यः ष्णवो जनः ॥ २३ ॥

ततः अनन्तरम् अस्य स्तोत्रस्य प्रारम्भकर्ता मानवः अभिलषितं सर्वं फलमवाप्नोति । शतवारं सहस्रवारं वा विष्णुभक्तः सन् यः एतत् स्तोत्रं पठेत् सः— ॥ २३ ॥

श्रीवृन्दावनचन्द्रस्य प्रसादात्सर्वमाप्नुयात् ।
यद्गृहे पुस्तकं देवि पूजितं चैव तिष्ठति ॥ २४ ॥

श्रीवृन्दावनाह्लादकस्य श्रीकृष्णस्य प्रसादात् अनुग्रहात् अभीष्टं सर्वं प्राप्नुयात । एवं यस्य गृहे गोपालसहस्रनामस्तोत्रपुस्तकं पूजितं सत् तिष्ठति तस्य गृहे— ॥ २४ ॥

न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ।
सर्पाद्या भूतयक्षाद्या नश्यन्ते नात्र संशयः ॥ २५ ॥

मारी मारकः, दुर्भिक्षम् भिक्षाणामभावः न भवति ।
उपसर्गभयं च रोगादिभयं कचिदपि न भवति ।

सर्वभूतयक्षाद्याः नश्यन्ति । नात्र कोऽपि संशयः ॥ २५ ॥

श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ।
गृहे यत्र सहस्रं च नाम्नां तिष्ठति पूजितम् ॥ २६ ॥

यत्र गृहे नाम्नां सहस्रं गोपालनामसहस्रकं पूजितं तिष्ठति, तत्र गृहे श्रीसहितो गोपालो वसेत् ॥ २६ ॥

---

23 a क. ततः प्रारम्भकर्तासौ
ख घ. तत आरम्भकर्तासौ
23 c क. शतावर्तसहस्रं च
25 c क.ख.घ. सर्पादिभूतयक्षाद्याः
25 d ख.घ. नश्यन्ति नात्र
26 b क तस्य गृहे तदा
26 c क. यद्गृहे सहस्रं च

ओं तत्सदिति श्रीसंमोहनतन्त्रे *पार्वतीश्वरसंवादे
गोपालसहस्रनामस्तोत्रं सम्पूर्णम्

श्रीराधारमणः कृष्णः गुणरत्नैस्सुगुम्फिताम् ।
स्वीकृत्येमां मितां मालां स नो विष्णुः प्रसीदतु ॥

* क. हरगौरीसंवादे

# गोपालसहस्रनामावलिः

ओं देवाय नमः
,, कामदेवाय नमः
,, कामबीजशिरोमणये नमः
,, श्रीगोपालाय नमः
,, महापालाय नमः
,, वेदवेदान्तपारगाय नमः
,, कृष्णाय नमः
,, कमलपत्राक्षाय नमः
,, पुण्डरीकाय नमः
,, सनातनाय नमः
,, गोपतये नमः
,, भूपतये नमः
,, शास्त्रे नमः
,, प्रहर्त्रे नमः
,, विश्वतोमुखाय नमः
,, आदिकर्त्रे नमः
,, महाकर्त्रे नमः
,, महाकालाय नमः
,, प्रतापवते नमः
,, जगज्जीवाय नमः
,, जगद्धात्रे नमः
,, जगद्भर्त्रे नमः
,, जगद्वसवे नमः
,, मत्स्याय नमः
,, भीमाय नमः
,, कुहूभर्त्रे नमः
,, हर्त्रे नमः
,, वाराहमूर्तिमते नमः
,, नारायणाय नमः
,, हृषीकेशाय नमः
,, गोविन्दाय नमः

ओं गरुडध्वजाय नमः
,, गोकुलेन्द्राय नमः
,, महीचन्द्राय नमः
,, शर्वरीप्रियकारकाय नमः
,, कमलामुखलोलाक्षाय नम
,, पुण्डरीकाय नमः
,, शुभावहाय नमः
,, दुर्वाससे नमः
,, कपिलाय नमः
,, भौमाय नमः
,, सिन्धुसागरसंगमाय नमः
,, गोविन्दाय नमः
, गोपतये नमः
,, गोपाय नमः
,, कालिन्दीप्रेमपूरकाय नमः
,, गोपस्वामिने नमः
,, गोकुलेन्द्राय नमः
,, गोवर्धनवरप्रदाय नमः
,, नन्दादिगोकुलत्रात्रे नमः
,, दात्रे नमः
,, दारिद्र्यभञ्जनाय नमः
,, सर्वमङ्गलदात्रे नमः
,, सर्वकामप्रदायकाय नमः
,, आदिकर्त्रे नमः
,, महीभर्त्रे नमः
,, सर्वसागरसिन्धुजाय नमः
,, गजगामिने नमः
,, गजोद्धारिणे नमः
,, कामिने नमः
,, कामकलानिधये नमः
,, कलङ्करहिताय नमः

ओं चन्द्राय नमः
,, बिम्बास्याय नमः
,, बिम्बसत्तमाय नमः
,, मालाकारकृपाकाराय नमः
,, कोकिलस्वरभूषणाय नमः
,, रामाय नमः
,, नीलाम्बराय नमः
,, देवाय नमः
,, हलिने नमः
,, दुर्दमर्दनाय नमः
,, सहस्राक्षपुरीभेत्रे नमः
,, महामारिघ्ने नमः
,, विनाशनाय नमः
,, शिवाय नमः
,, शिवतमाय नमः
,, भेत्रे नमः
,, बलारातिप्रपूजकाय नमः
,, कुमारीवरदायिने नमः
,, वरेण्याय नमः
,, मीनकेतनाय नमः
,, नराय नमः
,, नारायणाय नमः
,, धीराय नमः
,, राधापतये नमः
,, उदारधिये नमः
,, श्रीपतये नमः
,, श्रीनिधये नमः
,, श्रीमते नमः
,, मापतये नमः
,, प्रतिराजघ्ने नमः
,, वृन्दापतये नमः
,, कुलग्रामिणे नमः
,, धामिने नमः
,, ब्रह्मणे नमः

ओं सनातनाय नमः
,, रेवतीरमणाय नमः
,, रामाय नमः
,, प्रियाय नमः
,, चञ्चललोचनाय नमः
,, रामायणशरीराय नमः
,, रामाय नमः
,, रामाय नमः
,, श्रियःपतये नमः
,, शर्वराय नमः
,, शर्वर्ये नमः
,, शर्वाय नमः
,, सर्वत्र शुभदायकाय नमः
,, राधाराधयित्रे नमः
,, राधिने नमः
,, राधिने नमः
,, राधाचित्तप्रमोदकाय नमः
,, राधारतिसुखोपेताय नमः
,, राधामोहनतत्पराय नमः
,, राधावशीकराय नमः
,, राधाहृदयाम्भोजषट्पदाय नमः
,, राधालिङ्गनसंमोहाय नमः
,, राधानर्तनकौतुकाय नमः
,, राधासंजातसंप्रीताय नमः
,, राधाकाम्यफलप्रदाय नमः
,, वृन्दापतये नमः
,, कोशनिधये नमः
,, कोकशोकविनाशनाय नमः
,, चन्द्रापतये नमः
,, चन्द्रपतये नमः
,, चण्डकोदण्डभञ्जनाय नमः
,, रामाय नमः
,, दाशरथये नमः
,, रामाय नमः

ओं भृगुवंशसमुद्भवाय नमः
,, आत्मारामाय नमः
,, जितक्रोधाय नमः
,, मोहाय नमः
,, मोहान्धभञ्जनाय नमः
,, वृषभानुभवाय नमः
,, भावाय नमः
,, काश्यपये नमः
,, करुणानिधये नमः
,, कोलाहलाय नमः
,, हलिने नमः
,, हालिने नमः
,, हेलिने नमः
,, हलधरप्रियाय नमः
,, राधामुखाब्जमार्तण्डाय नमः
,, भास्कराय नमः
,, रविजे नमः
,, विधवे नमः
,, विधये नमः
,, विधात्रे नमः
,, वरुणाय नमः
,, वारुणाय नमः
,, वारुणीप्रियाय नमः
,, रोहिणीहृदयानन्दनाय नमः
,, वसुदेवात्मजाय नमः
,, बलिने नमः
,, नीलाम्बराय नमः
,, रौहिणेयाय नमः
,, जरासन्धवधाय नमः
,, अमलाय नमः
,, नागाय नमः
,, नवाम्भसे नमः
,, विरुदाय नमः
,, वीरघ्ने नमः

ओं वरदाय नमः
,, वल्गिने नमः
,, गोपथाय नमः
,, विजयिने नमः
,, विदुषे नमः
,, शिपिविष्टाय नमः
,, सनातनाय नमः
,, परशुरामवचोग्राहिणे नमः
,, वरग्राहिणे नमः
,, शृगालघ्ने नमः
,, दमघोषोपदेष्ट्रे नमः
,, रथग्राहिणे नमः
,, सुदर्शनाय नमः
,, वीरपत्नीयशस्त्रात्रे नमः
,, जराव्याधिविघातकाय नमः
,, द्वारकावासतत्त्वज्ञाय नमः
,, हुताशनवरप्रदाय नमः
,, यमुनावेगसंहारिणे नमः
,, नीलाम्बरधराय नमः
,, प्रभवे नमः
,, विभवे नमः
,, शरासनाय नमः
,, धन्विने नमः
,, गणेशाय नमः
,, गणनायकाय नमः
,, लक्ष्मणाय नमः
,, लक्षणाय नमः
,, लक्ष्याय नमः
,, रक्षोवंशविनाशनाय नमः
,, वामनाय नमः
,, वामनीभूताय नमः
,, अवामनाय नमः
,, वामनारुहाय नमः
,, यशोदानन्दनाय नमः

ओं कर्त्रे नमः
,, यमलार्जुनमुक्तिदाय नमः
,, उलूखलिने नमः
,, महामानिने नमः
,, दामबद्धाह्वयिने नमः
,, शमिने नमः
,, भक्तानुकारिणे नमः
,, भगवते नमः
,, केशवाय नमः
,, बलधारकाय नमः
,, केशिघ्ने नमः
,, मधुघ्ने नमः
,, मोहिने नमः
,, वृषासुरविघातकाय नमः
,, अघासुरविनाशिने नमः
,, पूतनामोक्षदायकाय नमः
,, कुब्जाविनोदिने नमः
,, भगवते नमः
,, कंसमृत्युमहामखिने नमः
,, अश्वमेधाय नमः
,, वाजपेयाय नमः
,, गोमेधाय नमः
,, नरमेधवते नमः
,, कन्दर्पकोटिलावण्याय नमः
,, चन्द्रकोटिसुशीतलाय नमः
,, रविकोटिप्रतीकाशाय नमः
,, वायुकोटिमहाबलाय नमः
,, ब्रह्मणे नमः
,, ब्रह्माण्डकर्त्रे नमः
,, कमलावाञ्छितप्रदाय नमः
,, कमलाकमलाक्षाय नमः
,, कमलामुखलोलुपाय नमः
,, कमलाव्रतधारिणे नमः
,, कमलाभाय नमः

ओं पुरन्दराय नमः
,, सौभाग्याधिकचित्ताय नमः
,, महामायिने नमः
,, महोत्कटाय नमः
,, तारकारये नमः
,, सुरत्राणे नमः
,, मारीचक्षोभकारकाय नमः
,, विश्वामित्रप्रियाय नमः
,, दान्ताय नमः
,, रामाय नमः
,, राजीवलोचनाय नमः
,, लङ्काधिपकुलध्वंसिने नमः
,, विभीषणवरप्रदाय नमः
,, सीतानन्दकराय नमः
,, रामाय नमः
,, वीराय नमः
,, वारिधिबन्धनाय नमः
,, खरदूषणसंहारिणे नमः
,, साकेतपुरवासवते नमः
,, चन्द्रावलीपतये नमः
,, कूलाय नमः
,, केशिकंसवधाय नमः
,, अमलाय नमः
,, माधवाय नमः
,, मधुघ्ने नमः
,, माध्विने नमः
,, माध्वीकाय नमः
,, माधवाय नमः
,, विभवे नमः
,, मुञ्जाटवीगाहमानाय नमः
,, धेनुकारये नमः
,, धरात्मजाय नमः
,, वंशीवटविहारिणे नमः
,, गोवर्धनवनाश्रयाय नमः

ओं तालवनोद्देशिने नमः
,, भाण्डीरवनशङ्खघ्ने नमः
,, तृणावर्तकृपाकारिणे नमः
,, वृषभानुसुतापतये नमः
,, राधाप्राणसमाय नमः
,, राधावदनाब्जमधुव्रताय नमः
,, गोपीरञ्जनदैवज्ञाय नमः
,, लीलाकमलपूजिताय नमः
,, क्रीडाकमलसन्दोहाय नमः
,, गोपिकाप्रीतिरञ्जनाय नमः
,, रञ्जकाय नमः
,, रञ्जनाय नमः
,, रङ्गाय नमः
,, रङ्गिणे नमः
,, रङ्गमहीरुहाय नमः
,, कामाय नमः
,, कामारिभक्ताय नमः
,, पुराणपुरुषाय नमः
,, कवये नमः
,, नारदाय नमः
,, देवलाय नमः
,, भीमाय नमः
,, बालाय नमः
,, बालमुखाम्बुजाय नमः
,, अम्बुजाय नमः
,, ब्रह्मसाक्षिणे नमः
,, योगिने नमः
,, दत्तवराय नमः
,, मुनये नमः
,, ऋषभाय नमः
,, पर्वताय नमः
,, ग्रामाय नमः
,, नदीपवनवल्लभाय नमः
,, पद्मनाभाय नमः

ओं सुरज्येष्ठाय नमः
,, ब्रह्मणे नमः
,, रुद्राय नमः
,, अहिभूषिताय नमः
,, गणानां त्राणकर्त्रे नमः
,, गणेशाय नमः
,, ग्रहिलाय नमः
,, ग्रहिणे नमः
,, गणाश्रयाय नमः
,, गणाध्यक्षाय नमः
,, क्रोडीकृतजगत्त्रयाय नमः
,, यादवेन्द्राय नमः
,, द्वारकेन्द्राय नमः
,, मथुरावल्लभाय नमः
,, धुरिणे नमः
,, भ्रमराय नमः
,, कुन्तलिने नमः
,, कुन्तीसुतरक्षाय नमः
,, महामखिने नमः
,, यमुनावरदात्रे नमः
,, कश्यपस्य वरप्रदाय नमः
,, शङ्खचूडवधोद्दामाय नमः
,, गोपीरक्षणतत्पराय नमः
,, पाञ्चजन्यकराय नमः
,, रामिणे नमः
,, त्रिरामिणे नमः
,, वनजाय नमः
,, जयाय नमः
,, फल्गुनाय नमः
,, फल्गुनसखाय नमः
,, विराधवधकारकाय नमः
,, रुक्मिणीप्राणनाथाय नमः
,, सत्यभामाप्रियंकराय नमः
,, कल्पवृक्षाय नमः

ओं महावृक्षाय नमः
,, दानवृक्षाय नमः
,, महाफलाय नमः
,, अङ्कुशाय नमः
,, भूसुराय नमः
,, भावाय नमः
,, भ्रामकाय नमः
,, भामकाय नमः
,, हरये नमः
,, सरलाय नमः
,, शाश्वताय नमः
,, वीराय नमः
,, यदुवंशिने नमः
,, शिवात्मकाय नमः
,, प्रद्युम्नाय नमः
,, बलकर्त्रे नमः
,, प्रहर्त्रे नमः
,, दैत्यघ्ने नमः
,, प्रभवे नमः
,, महाधनिने नमः
,, महावीराय नमः
,, वनमालाविभूषणाय नमः
,, तुलसीदामशोभाढ्याय नमः
,, जालन्धरविनाशनाय नमः
,, शूराय नमः
,, सूर्याय नमः
,, मृतण्डाय नमः
,, भास्कराय नमः
,, विश्वपूजिताय नम.
,, रवये नमः
,, तमोघ्ने नमः
,, वह्नये नमः
,, वाडवाय नमः
,, वडवानलाय नमः

ओं दैत्यदर्पविनाशिने नमः
,, गरुडाय नमः
,, गरुडाग्रजाय नमः
,, गोपीनाथाय नमः
,, महीनाथाय नमः
,, वृन्दानाथाय नमः
,, अविरोधकाय नमः
,, प्रपञ्चिने नमः
,, पञ्चरूपाय नमः
,, लतागुल्माय नमः
,, गोपतये नमः
,, गङ्गायै नमः
,, यमुनारूपाय नमः
,, गोदायै नमः
,, वेत्रवत्यै नमः
,, कावेर्यै नमः
,, नर्मदायै नमः
,, ताप्त्यै नमः
,, गण्डक्यै नमः
,, सरय्वै नमः
,, राजसाय नमः
,, तामसाय नमः
,, सत्त्विने नमः
,, सर्वाङ्गिने नमः
,, सर्वलोचनाय नमः
ओं सुधामयाय नमः
,, अमृतमयाय नमः
,, योगिनीवल्लभाय नमः
,, शिवाय नमः
,, बुद्धाय नमः
,, बुद्धिमतां श्रेष्ठाय नमः
,, विष्णवे नमः
,, जिष्णवे नमः
,, शचीपतये नमः

ओं वंशिने नमः
,, वंशधराय नमः
,, लोकाय नमः
,, विलोकाय नमः
,, मोहनाशनाय नमः
,, रवरावाय नमः
,, रवाय नमः
,, रावाय नमः
,, बलाय नमः
,, बालबलाहकाय नमः
,, शिवाय नमः
,, रुद्राय नमः
,, नलाय नमः
,, नीलाय नमः
,, लाङ्गलिने नमः
,, लाङ्गलाश्रयाय नमः
,, पारदाय नमः
,, पावनाय नमः
,, हंसाय नमः
,, हंसारूढाय नमः
,, जगत्पतये नमः
,, मोहिनीमोहनाय नमः
,, मायिने नमः
,, महामायाय नमः
,, महामखिने नमः
,, वृषाय नमः
,, वृषाकपये नमः
,, कालाय नमः
,, कालीदमनकारकाय नमः
,, कुब्जाभाग्यप्रदाय नमः
,, वीराय नमः
,, रजकक्षयकारकाय नमः
,, कोमलाय नमः
,, वारुणाय नमः

ओं राज्ञे नमः
,, जलजाय नमः
,, जलधारकाय नमः
,, हारकाय नमः
,, सर्वपापघ्नाय नमः
,, परमेष्ठिने नमः
,, पितामहाय नमः
,, खड्गधारिणे नमः
,, कृपाकारिणे नमः
,, राधारमणसुन्दराय नमः
,, द्वादशारण्यसम्भोगिने नमः
,, शेषनागफणालयाय नमः
,, कामाय नमः
,, श्यामाय नमः
,, सुखश्रीदाय नमः
,, श्रीपतये नमः
,, श्रीनिधये नमः
,, कृतिने नमः
,, हरये नमः
,, नारायणाय नमः
,, नाराय नमः
,, नरोत्तमाय नमः
,, इषुप्रियाय नमः
,, गोपालिने नमः
,, चित्तहर्त्रे नमः
,, कर्त्रे नमः
,, संसारतारकाय नमः
,, आदिदेवाय नमः
,, महादेवाय नमः
,, गौरीगुरवे नमः
,, अनाश्रयाय नमः
,, साधवे नमः
,, मधवे नमः
,, विधवे नमः

ओं धात्रे नमः
,, भ्रात्रे नमः
,, अक्रूरपरायणाय नमः
,, रोलम्बिने नमः
,, हयग्रीवाय नमः
,, वानरारये नमः
,, वनाश्रयाय नमः
,, वनाय नमः
,, वनिने नमः
,, वनाध्यक्षाय नमः
,, महावन्द्याय नमः
,, महामुनये नमः
,, स्यामन्तकमणिप्राज्ञाय नमः
,, विज्ञाय नमः
,, विघ्नविघातकाय नमः
,, गोवर्धनाय नमः
,, वर्धनीयाय नमः
,, वर्धनाय नमः
,, वर्धनप्रियाय नमः
,, वर्धन्याय नमः
,, वर्धनाय नमः
,, वर्धिने नमः
,, वार्धिष्णवे नमः
,, सुमुखप्रियाय नमः
,, वर्धिताय नमः
,, वृद्धकाय नमः
,, वृद्धाय नमः
,, वृन्दारकजनप्रियाय नमः
,, गोपालरमणीभर्त्रे नमः
,, साम्बकुष्ठविनाशकाय नमः
,, रुक्मिणीहरणप्रेम्णे नमः
,, प्रेमिणे नमः
,, चन्द्रावलीपतये नमः
,, श्रीकर्त्रे नमः

ओं विश्वभर्त्रे नमः
,, नराय नमः
,, नारायणाय नमः
,, बलिने नमः
,, गणाय नमः
,, गणपतये नमः
,, दत्तात्रेयाय नमः
,, महामुनये नमः
,, व्यासाय नमः
,, नारायणाय नमः
,, दिव्याय नमः
,, भव्याय नमः
,, भावुकधारकाय नमः
,, श्वःश्रेयसाय नमः
,, शिवाय नमः
,, भद्राय नमः
,, भावुकाय नमः
,, भाविकाय नमः
,, शुभाय नमः
,, शुभात्मकाय नमः
,, शुभाय नमः
,, शास्त्रे नमः
,, प्रशास्त्रे नमः
,, मेघनादघ्ने नमः
,, ब्रह्मण्यदेवाय नमः
,, दीनानामुद्धारकरणक्षमाय नमः
,, कृष्णाय नमः
,, कमलपत्राक्षाय नमः
,, कृष्णाय नमः
,, कामिने नमः
,, सदा कृष्णाय नमः
,, समस्तप्रियकारकाय नमः
,, नम्याय नमः
,, नम्बिने नमः

ओं महानन्दिने नमः
,, मालिने नमः
,, मालनकाय नमः
,, किलिने नमः
,, मिलिने नमः
,, हिलिने नमः
,, गिलिने नमः
,, गोलिने नमः
,, गोलिने नमः
,, गोलाय नमः
,, गोलालयाय नमः
,, गुलिने नमः
,, गुग्गुलिने नमः
,, मारकिने नमः
,, शाखिने नमः
,, वटाय नमः
,, पिप्पलकाय नमः
,, कृतिने नमः
,, म्लेच्छघ्ने नमः
,, कालकर्त्रे नमः
,, यशोदायशसे नमः
,, अच्युताय नमः
,, केशवाय नमः
,, विष्णवे नमः
,, हरये नमः
,, सत्याय नमः
,, जनार्दनाय नमः
,, हंसाय नमः
,, नारायणाय नमः
,, लीलाय नमः
,, नीलाय नमः
,, भक्तिपरायणाय नमः
,, जानकीवल्लभाय नमः
,, रामाय नमः

ओं विरामाय नमः
,, विघ्ननाशनाय नमः
,, सहभानवे नमः
,, महाभानवे नमः
,, वीरबाहवे नमः
,, महोदधये नमः
,, समुद्राय नमः
,, अब्धये नमः
,, अकूपाराय नमः
,, पारावाराय नमः
,, सरित्पतये नमः
,, गोकुलानन्दकारिणे नमः
,, प्रतिज्ञापरिपालकाय नमः
,, सदारामाय नमः
,, कृपारामाय नमः
,, महारामाय नमः
,, धनुर्धराय नमः
,, पर्वताय नमः
,, पर्वताकाराय नमः
,, गयाय नमः
,, गेयाय नमः
,, द्विजप्रियाय नमः
,, कम्बलाश्वतराय नमः
,, रामाय नमः
,, रामायणप्रवर्तकाय नमः
,, दिवे नमः
,, दिवाय नमः
,, दिवसाय नमः
,, दिव्याय नमः
,, भव्याय नमः
,, भाविने नमः
,, भयापहाय नमः
,, पार्वतीभाग्यसहिताय भर्त्रे नम
,, लक्ष्मीविलासवते नमः

ओं विलासिने नमः
,, साहसिने नमः
,, सर्विणे नमः
,, गर्विणे नमः
,, गर्वितलोचनाय नमः
,, मुरारये नमः
,, लोकधर्मज्ञाय नमः
,, जीवनाय नमः
,, जीवनान्तकाय नमः
,, यमाय नमः
,, यमादियमनाय नमः
,, यामिने नमः
,, यामविधायकाय नमः
,, वसुल्यै नमः
,, पांसुल्यै नमः
,, पांसवे नमः
,, पाण्डवे नमः
,, अर्जुनवल्लभाय नमः
,, ललिताचन्द्रिकामालिने नमः
,, मालिने नमः
,, मालाम्बुजाश्रयाय नमः
,, अम्बुजाक्षाय नमः
,, महायक्षाय नमः
,, दक्षाय नमः
,, चिन्तामणये नमः
,, प्रभवे नमः
,, मणये नमः
,, दिनमणये नमः
,, केदाराय नमः
,, बदरीश्रयाय नमः
,, बदरीवनसम्प्रीताय नमः
,, व्यासाय नमः
,, सत्यवतीसुताय नमः
,, अमरारिनिहन्त्रे नमः

ओं सुधासिन्धुविधूदयाय नमः
,, चन्द्राय नमः
,, रवये नमः
,, शिवाय नमः
,, शूलिने नमः
,, चक्रिणे नमः
,, गदाधराय नमः
,, श्रीकर्त्रे नमः
,, श्रीपतये नमः
,, श्रीदाय नमः
,, श्रीदेवाय नमः
,, देवकीसुताय नमः
,, श्रीपतये नमः
,, पुण्डरीकाक्षाय नमः
,, पद्मनाभाय नमः
,, जगत्पतये नमः
,, वासुदेवाय नमः
,, अप्रमेयात्मने नमः
,, केशवाय नमः
,, गरुडध्वजाय नमः
,, नारायणाय नमः
,, परस्मै धाम्ने नमः
,, देवदेवाय नमः
,, महेश्वराय नमः
,, चक्रपाणये नमः
,, कलापूर्णाय नमः
,, वेदवेद्याय नमः
,, दयानिधये नमः
,, भगवते नमः
,, सर्वभूतेशाय नमः
,, गोपालाय नमः
,, सर्वपालकाय नमः
,, अनन्ताय नमः
,, निर्गुणाय नमः

ओं नित्याय नमः
,, निर्विकल्पाय नमः
,, निरञ्जनाय नमः
,, निराधाराय नमः
,, निराकाराय नमः
,, निराभासाय नमः
,, निराश्रयाय नमः
,, पुरुषाय नमः
,, प्रणवातीताय नमः
,, मुकुन्दाय नमः
,, परमेश्वराय नमः
,, क्षणावनये नमः
,, सार्वभौमाय नमः
,, वैकुण्ठाय नमः
,, भक्तवत्सलाय नमः
,, विष्णवे नमः
,, दामोदराय नमः
,, कृष्णाय नमः
,, माधवाय नमः
,, मथुरापतये नमः
,, देवकीगर्भसम्भूताय नमः
,, यशोदावत्सलाय नमः
,, हरये नमः
,, शिवाय नमः
,, संकर्षणाय नमः
,, शम्भवे नमः
,, भूतनाथाय नमः
,, दिवस्पतये नमः
,, अव्ययाय नमः
,, सर्वधर्मज्ञाय नमः
,, निर्मलाय नमः
,, निरुपद्रवाय नमः
,, निर्वाणनायकाय नमः
,, नित्याय नमः

ओं नीलजीमूतसंनिभाय नमः
,, कलाक्षयाय नमः
,, सर्वज्ञाय नमः
,, कमलारूपतत्पराय नमः
,, हृषीकेशाय नमः
,, पीतवाससे नमः
,, वसुदेवप्रियात्मजाय नमः
,, नन्दगोपकुमारार्याय नमः
,, नवनीताशनाय नमः
,, विभवे नमः
,, पुराणपुरुषाय नमः
,, श्रेष्ठाय नमः
,, शङ्खपाणये नमः
,, सुविक्रमाय नमः
,, अनिरुद्धाय नमः
,, चक्ररथाय नमः
,, शार्ङ्गपाणये नमः
,, चतुर्भुजाय नमः
,, गदाधराय नमः
,, सुरार्तिघ्नाय नमः
,, गोविन्दाय नमः
,, नन्दकायुधाय नमः
,, वृन्दावनचराय नमः
,, शौरये नमः
,, वेणुवाद्यविशारदाय नमः
,, तृणावर्तान्तकाय नमः
,, भीमसाहसिने नमः
,, बहुविक्रमाय नमः
,, शकटासुरसंहारिणे नमः
,, बकासुरविनाशनाय नमः
,, धेनुकासुरसंहारिणे नमः
,, पूतनारये नमः
,, नृकेसरिणे नमः
,, पितामहाय नमः

ओं गुरवे नमः
,, प्रत्यगात्मने नमः
,, सदाशिवाय नमः
,, अप्रमेयाय नमः
,, प्रभवे नमः
,, प्राज्ञाय नमः
,, अप्रतर्क्याय नमः
,, स्वप्नवर्धनाय नमः
,, धन्याय नमः
,, मान्याय नमः
,, भवाय नमः
,, भावाय नमः
,, धीराय नमः
,, शान्ताय नमः
,, जगद्गुरवे नमः
,, अन्तर्यामिणे नमः
,, ईश्वराय नमः
,, दिव्याय नमः
,, दैवज्ञाय नमः
,, देवसंस्तुताय नमः
,, क्षीराब्धिशयनाय नमः
,, धात्रे नमः
,, लक्ष्मीवते नमः
,, लक्ष्मणाग्रजाय नमः
,, धात्रीपतये नमः
,, अमेयात्मने नमः
,, चन्द्रशेखरपूजिताय नमः
,, लोकसाक्षिणे नमः
,, जगच्चक्षुषे नमः
,, पुण्यचारित्रकीर्तनाय नमः
,, कोटिमन्मथसौन्दर्याय नमः
,, जगन्मोहनविग्रहाय नमः
,, मन्दस्मितताननाय नमः
,, गोपाय नमः

ओं गोपिकापरिवेष्टिताय नमः
,, फुल्लारविन्दनयनाय नमः
,, चाणूरान्ध्रनिषूदनाय नमः
,, इन्दीवरदलश्यामाय नमः
,, बर्हिबर्हावतंसकाय नमः
,, मुरलीनिनदाह्लादाय नमः
,, दिव्यमाल्याम्बरावृताय नम
,, सुकपोलयुगाय नमः
,, सुभ्रूयुगलाय नमः
,, सुललाटकाय नमः
,, कम्बुग्रीवाय नमः
,, विशालाक्षाय नमः
,, लक्ष्मीवते नमः
,, शुभलक्षणाय नमः
,, पीनवक्षसे नमः
,, चतुर्बाहवे नमः
,, चतुर्मूर्तये नमः
,, त्रिविक्रमाय नमः
,, कलङ्करहिताय नमः
,, शुद्धाय नमः
,, दुष्टशत्रुनिबर्हणाय नमः
,, किरीटकुण्डलधराय नमः
,, कटकाङ्गदमण्डिताय नमः
,, मुद्रिकाभरणोपेताय नमः
,, कटिसूत्रविराजिताय नमः
,, मञ्जीररञ्जितपदाय नमः
,, सर्वाभरणभूषिताय नमः
,, विन्यस्तपादयुगलाय नमः
,, दिव्यमङ्गलविग्रहाय नमः
,, गोपिकानयनानन्दाय नमः
,, पूर्णचन्द्रनिभाननाय नमः
,, समस्तजगदानन्दाय नमः
,, सुन्दराय नमः
,, लोकनन्दनाय नमः

ॐ यमुनातीरसञ्चारिणे नमः

,, राधामन्मथवैभवाय नमः

,, गोपनारीप्रियाय नमः

,, दान्ताय नमः

,, गोपीवस्त्रापहारकाय नमः

,, शृङ्गारमूर्तये नमः

,, श्रीधाम्ने नमः

,, तारकाय नमः

,, मूलकारणाय नमः

,, सृष्टिसंरक्षणोपायाय नमः

,, क्रूरासुरविभञ्जनाय नमः

,, नरकासुरसंहारिणे नमः

,, मुरारये नमः

,, अरिमर्दनाय नमः

,, आदितेयप्रियाय नमः

,, दैत्यभीकराय नमः

,, यदुशेखराय नमः

,, जरासन्धकुलध्वंसिने नमः

,, कंसारातये नमः

,, सुविक्रमाय नमः

,, पुण्यश्लोकाय नमः

,, कीर्तनीयाय नमः

,, यादवेन्द्राय नमः

,, जगन्नुताय नमः

,, रुक्मिणीरमणाय नमः

,, सत्यभामाजाम्बवतीप्रियाय नमः

,, मित्रविन्दानाग्नजितीलक्ष्मणा-<br>समुपासिताय नमः

,, सुधाकरकुले जाताय नमः

,, अनन्तप्रबलविक्रमाय नमः

,, सर्वसौभाग्यसम्पन्नाय नमः

,, द्वारकापत्तने स्थिताय नमः

,, भद्रासूर्यसुतानाथाय नमः

,, लीलामानुषविग्रहाय नमः

ॐ सहस्रषोडशस्त्रीशाय नमः

,, भोगमोक्षैकदायकाय नमः

,, वेदान्तवेद्याय नमः

,, संवेद्याय नमः

,, वैद्याय नमः

,, ब्रह्माण्डनायकाय नमः

,, गोवर्धनधराय नमः

,, नाथाय नमः

,, सर्वजीवदयापराय नमः

,, मूर्तिमते नमः

,, सर्वभूतात्मने नमः

,, आर्तत्राणपरायणाय नमः

,, सर्वज्ञाय नमः

,, सर्वसुलभाय नमः

,, सर्वशास्त्रविशारदाय नमः

,, षड्गुणैश्वर्यसम्पन्नाय नमः

,, पूर्णकामाय नमः

,, धुरन्धराय नमः

,, महानुभावाय नमः

,, कैवल्यदायकाय नमः

,, लोकनायकाय नमः

,, आदिमध्यान्तरहिताय नमः

,, शुद्धसात्त्विकविग्रहाय नमः

,, असमानाय नमः

,, समस्तात्मने नमः

,, शरणागतवत्सलाय नमः

,, उत्पत्तिस्थितिसंहारकारणाय नमः

,, सर्वकारणाय नमः

,, गम्भीराय नमः

,, सर्वभावज्ञाय नमः

,, सच्चिदानन्दविग्रहाय नमः

,, विष्वक्सेनाय नमः

,, सत्यसन्धाय नमः

,, सत्यवाचे नमः

ओं सत्यविक्रमाय नमः
,, सत्यव्रताय नमः
,, सत्यरताय नमः
,, सत्यधर्मपरायणाय नमः
,, आपन्नार्तिप्रशमनाय नमः
,, द्रौपदीमानरक्षकाय नमः
,, कन्दर्पजनकाय नमः
,, प्राज्ञाय नमः
,, जगन्नाटकवैभवाय नमः
,, भक्तिवश्याय नमः
,, गुणातीताय नमः
,, सर्वैश्वर्यप्रदायकाय नमः
,, दमघोषसुतद्वेषिणे नमः
,, बाणबाहुविखण्डनाय नमः
,, भीष्मभक्तिप्रदाय नमः
,, दिव्याय नमः
,, कौरवान्वयनाशनाय नमः
,, कौन्तेयप्रियबन्धवे नमः
,, पार्थस्यन्दनसारथये नमः
,, नारसिंहाय नमः
,, महावीराय नमः
,, स्तम्भजाताय नमः
,, महाबलाय नमः
,, प्रह्लादवरदाय नमः
,, सत्याय नमः
,, देवपूज्याय नमः
,, अभयंकराय नमः
,, उपेन्द्राय नमः
,, इन्द्रावरजाय नमः
,, वामनाय नमः
,, बलिबन्धनाय नमः
,, गजेन्द्रवरदाय नमः
,, स्वामिने नमः
,, सर्वदेवनमस्कृताय नमः

ओं शेषपर्यङ्कशयनाय नमः
,, वैनतेयरथाय नमः
,, जयिने नमः
,, अव्याहतबलैश्वर्यसम्पन्नाय नमः
,, पूर्णमानसाय नमः
,, योगेश्वरेश्वराय नमः
,, साक्षिणे नमः
,, क्षेत्रज्ञाय नमः
,, ज्ञानदायकाय नमः
,, योगिहृत्पङ्कजावासाय नमः
,, योगमायासमन्विताय नमः
,, नादबिन्दुकलातीताय नमः
,, चतुर्वर्गफलप्रदाय नमः
,, सुषुम्नामार्गसञ्चारिणे नमः
,, देहस्यान्तरसंस्थिताय नमः
,, देहेन्द्रियमनःप्राणसाक्षिणे नमः
,, चेतःप्रसादकाय नमः
,, सूक्ष्माय नमः
,, सर्वगताय नमः
,, देहिने नमः
,, ज्ञानदर्पणगोचराय नमः
,, तत्त्वत्रयात्मकाय नमः
,, अव्यक्ताय नमः
,, कुण्डलिने नमः
,, समुपाश्रिताय नमः
,, ब्रह्मण्याय नमः
,, सर्वधर्मज्ञाय नमः
,, शान्ताय नमः
,, दान्ताय नमः
,, गतक्लमाय नमः
,, श्रीनिवासाय नमः
,, सदानन्दाय नमः
,, विश्वमूर्तये नमः
,, महाप्रभवे नमः

Q22:4146
15M85



ओं सहस्रशीर्ष्णे नमः
,, पुरुषाय नमः
,, सहस्राक्षाय नमः
,, सहस्रपदे नमः
,, समस्तभुवनाधाराय नमः
,, समस्तप्राणरक्षकाय नमः
,, समस्तसर्वभावज्ञाय नमः
,, गोपिकाप्राणवल्लभाय नमः
,, नित्योत्सवाय नमः
,, नित्यसौख्याय नमः
,, नित्यश्रिये नमः
,, नित्यमङ्गलाय नमः
,, व्यूहार्चिताय नमः
,, जगन्नाथाय नमः
,, श्रीवैकुण्ठपुराधिपाय नमः
,, पूर्णानन्दघनीभूताय नमः
,, गोपवेषधराय नमः
,, हरये नमः
,, कलापकुसुमश्यामाय नमः
,, कोमलाय नमः
,, शान्तविग्रहाय नमः
,, गोपाङ्गनावृताय नमः
,, अनन्ताय नमः
,, वृन्दावनसमाश्रयाय नमः
,, वेणुवादरताय नमः
,, देवानां श्रेष्ठाय नमः
,, हितकारकाय नमः
,, बालक्रीडासमासक्ताय नमः

ओं नवनीतस्य तस्कराय नमः
,, गोपालकामिनीजाराय नमः
,, चोरजारशिखामणये नमः
,, परस्मै ज्योतिषे नमः
,, पराकाशाय नमः
,, परावासाय नमः
,, परिस्फुटाय नमः
,, अष्टादशाक्षरमन्त्राय नमः
,, व्यापकाय नमः
,, लोकपावनाय नमः
,, सप्तकोटिमहामन्त्रशेखराय नमः
,, देवशेखराय नमः
,, विज्ञानज्ञानसन्धानाय नमः
,, तेजोराशये नमः
,, जगत्पतये नमः
,, भक्तलोकप्रसन्नात्मने नमः
,, भक्तमन्दारविग्रहाय नमः
,, भक्तदारिद्र्यदमनाय नमः
,, भक्तानां प्रीतिदायकाय नमः
,, भक्ताधीनमनसे नमः
,, पूज्याय नमः
,, भक्तलोकशिवंकराय नमः
,, भक्ताभीष्टप्रदाय नमः
,, सर्वभक्ताघौघनिकृन्तनाय नमः
,, अपारकरुणासिन्धवे नमः
,, भगवते नमः
,, भक्ततत्पराय नमः

आहृत्य १००० नामानि भवन्ति

इति श्रीगोपालसहस्रनामावलिः समाप्ता

ओं तत् सत् ।

SRI VENKATESWARA CENTRAL LIBRARY & RESEARCH CENTRE
TIRUPATI.
23213

मुद्रण:

तिरुमल - तिरुपति देवस्थानानि मुद्रणालयस्य मुद्रितम् ।

T. T. D. Religious Publications Series No. 221

Price : Rs. 5-00

Printed and Published by S. Lakshminarayana, I.A.S.,
Executive Officer, Tirumala Tirupati Devasthanams and
Printed at Tirumala Tirupati Devasthanams Press, Tirupati.